आ० टी० ।[1] स्वातन्त्र्ये सति भीतेरवकाशो नास्तीत्याशङ्क्याह **इदं चेति** ॥ ५९ ॥

प० टी० । कामं विनङ्क्ष्यामि नतु बन्धुभिः संयोत्स्य इति चेदित्याह **यदिति** । यद्यदि मदुक्तमनादृत्य केवलमहंकारमवलम्ब्य युद्धं न करिष्यामीति मन्यसे तर्ह्येष व्यवसायश्चित्तोद्वेगो मिथ्या निरर्थक एव यतः प्रकृतिस्त्वां नियोक्ष्यति प्रवर्तयिष्यत्येव तस्या अपि मदधीनत्वादिति भावः ॥५९॥

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ॥
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥६०॥

यस्माच्च स्वभावजेन शौर्यादिना कौन्तेय यथोक्तेन निबद्धो निश्चयेन बद्धः स्वेनात्मीयेन कर्मणा कर्तुं नेच्छसि यत् कर्म मोहादविवेकतः करिष्यस्यवशोऽपि परवश एव तत् कर्म ॥ ६० ॥

आ० टी० । इतश्च त्वया युद्धान्न वैमुख्यं कर्तुमुचितमित्याह **यस्माच्चेति** । स्वभावजेन **कर्मणा** निबद्धस्त्वमिति संबन्धः । इतोऽपि त्वया युद्धं कर्तव्यमेवेत्याह **यस्मादिति** ॥ ६० ॥

प० टी० । किं च **स्वभावजेनेति** । स्वभावः क्षत्रियत्वप्रापकः पूर्वकर्मसंस्कारस्तस्माज्जातेन स्वकीयेन कर्मणा शौर्यादिना पूर्वोक्तेन निबद्धो नियन्त्रितः सन् यदि मोहादित्युपलक्षणं कर्म **कर्तुं** नेच्छसि तथाप्यवशः सन् कर्म करिष्यस्येव—' प्राक्संस्कारपरंपरापरिणतं प्रायो मनः प्राणिनां कस्तस्य प्रकृतिं निरस्य सहजां कर्तान्यथा स्यान्नरः । दौर्गन्ध्यं लशुनादिकस्य सहजं यत्नात्समुत्सारयन् सौरभ्यं वितनोति कः सुरभितां कर्पूरमुख्यस्य वा' इति । तदेवं सांख्यमीमांसकादिमतेन प्रकृतिपारतन्त्र्यं स्वभावपारतन्त्र्यं च निरूप्य युद्धानादरो निषिद्धः ॥ ६० ॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

यस्मादीश्वर ईशनशीलो नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे हृदयदेशेऽर्जुन शुक्लान्तरात्मस्वभावो विशुद्धान्तःकरण इति, 'अहश्च कृष्णमहरर्जुनं च' इति दर्शनात्, तिष्ठति स्थितिं लभते स कथं तिष्ठतीत्याह भ्रामयन् भ्रमणं कारयन् सर्वभूतानि यन्त्रारूढानीव यन्त्राण्यारूढान्यधिष्ठितानीवेतीवशब्दोऽत्र द्रष्टव्यो यथा दारुकृतपुरुषादीनि यन्त्रारूढानि मायया छद्मना भ्रामयंस्तिष्ठतीति संबन्धः ॥ ६१ ॥

आ० टी० । अर्जुनशब्दस्योक्तार्थत्वे श्रुतिमुदाहरति **अहश्चेति** । अहश्च कृष्णमहरर्जुनं च[2] विवर्तेते रजसा वेद्याभिः इत्यत्र किञ्चिदहस्तावत् कृष्णमस्वच्छङ्कलुषितमिव लक्ष्यते किंचित् पुनरर्जुनमतिस्वच्छं शुद्धस्वभावमुपलभ्यते एवमर्जुनशब्दस्य शुक्लशब्दपर्यायतया प्रयोगदर्शनादुक्तार्थ-

---

१ इतश्च त्वया युद्धान्न वैमुख्यं कर्तुमुचितमित्याह मिथ्येति । पा० क्वचित् । २ पुनरहरर्जुनमिति—पा० क्वचित् ।

त्वमुचितमित्यर्थः । यन्त्रारूढानीवेति कथमुच्यते तत्राह **इवशब्द इति** । तदेव प्रपञ्चयति **यथेति** । दारुमयानि यन्त्राणि यथा लौकिको मायावी मायया भ्रामयन्वर्तते तथेश्वरोऽपि सर्वाणि भूतानि भ्रामयन्नेव हृदये तिष्ठतीत्यर्थः ॥ ६१ ॥

प० टी० । इदानीं मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति स्वमतमुद्दिश्य स्वाश्रयवर्तित्वं चाह **ईश्वर इति** । भो अर्जुन सर्वभूतानां हृद्देशे ईश्वरोऽन्तर्यामित्वेन तिष्ठति किं कुर्वन् सर्वभूतानि जीवान् यन्त्राणि शरीराण्यारूढान्यधिष्ठितानि मायया स्वशक्त्या भ्रामयन् संनिधिमात्रेण व्यापारयन् न तु स्वयमित्यर्थः । श्रुतिरपि कण्वशाखारण्यके "यो वै स संवत्सरः प्रजापतिः षोडशकलोऽयमेवंवित्पुरुषस्य वित्तमेव पञ्चदशकला आत्मैवास्य षोडशी कला स वित्तेनैवाथ पूर्यते ऽपक्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तस्तस्मात्सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनागादित्याहुः"इति । भाष्यम्–य इति पूर्वोक्तः संवत्सरः कालरूपः षोडशकलः प्रजापतिरयमपि तन्निदिध्यासनात्तद्रूप एव पूर्वोक्त एवंवित्पुरुषः सोऽपि षोडशकलः प्रजापतिस्तस्यावित्तं पञ्चपञ्चसूक्ष्मभूतेन्द्रियप्राणात्मकं लिङ्गदेहं ता एव पञ्चदशकला आत्मैवास्य षोडशी कला स प्रागुक्तेन वित्तेन पूर्यतेऽपक्षीयते च प्रवृत्तिमार्गेण पूर्यते निवृत्तिमार्गेणापक्षीयते च उपरमं प्राप्नोति तदा षोडशी कलावशिष्टा भवति तत्र तदेतन्नभ्यं नाभौ भवं नाभ्यमत्रच्छान्दसः प्रयोगो नभ्यमिति । यद्वा मध्यप्रदेशोपस्थितं स्थिरं वस्तु विवक्षितं तेन नभसि हृदयाकाशेऽवस्थितं नभ्यम् तत्किम् यदयमात्मा "अजस्य नाभावध्येकमर्पित" इति श्रुतेः। अयमर्थः यथा कुलालचक्रस्य मध्यच्छिद्रे स्थितः कीलकश्चक्रचलनेऽपि न चलति तद्वेव नभ्यं तथा वित्तं प्राङ्निरूपितालिङ्गदेहं प्रधिः चक्रपरिधिवद्बाह्यपरिधिस्थानीयम् तस्माद्वित्ताद्यद्यपि सर्वज्यानिं सर्वस्वहानिं जीयते प्राप्नोति तथाप्यात्मना चेत्संपद्यते तदा जीवति जीवन्मुक्तो भवति । अथ प्रधिना शरीरेण चेत्संपद्यते तदागाद् गमनागमनं करोति ॥ ६१ ॥

तमेव शरणं गच्छ सर्वभावेन भारत ॥
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥

तमेवेश्वरं शरणमाश्रयं संसारार्तिहरणार्थं गच्छाश्रय सर्वभावेन सर्वात्मना हे भारत ततस्तत्प्रसादादीश्वरानुग्रहात् परां प्रकृष्टां शान्तिं परामुपरतिं स्थानं च मम विष्णोः परमं पदमवाप्स्यसि शाश्वतं नित्यम् ॥ ६२ ॥

आ० टी० । ईश्वरः सर्वाणि भूतानि प्रेरयति चेत् प्राप्तं कैवल्यार्थस्यापि पुरुषकारस्यानर्थक्यमित्याशङ्क्याह **तमेवेति** । सर्वात्मना मनोवृत्त्या वाचा कर्मणा चेत्यर्थः। ईश्वरस्यानुग्रहात्तत्त्वज्ञानोत्पत्तिपर्यन्तादिति शेषः। मुक्तास्तिष्ठन्त्यस्मिन्निति स्थानम् ॥ ६२ ॥

प० टी० । एवमन्वयव्यतिरेकाभ्यां प्रकृतेस्तदनुरूपसंस्काराणां वा ईश्वराधीनत्वात्सर्वत्र स एव शरणमिति ज्ञात्वा मदुक्तमनुसरेत्याह **तमेवेति** । तमेव मामीश्वरमन्तर्यामिणं सर्वभावेन सर्वात्मना शरणं व्रज । तत्प्रसादात्परामुत्कृष्टां शान्तिं निर्वृतिं शाश्वतं नित्यं स्थानं च प्राप्स्यसि । तदुक्तम्–स्थूलं वपुः परिधिरान्तरमस्य सूक्ष्मं देवालयं तदिह देवगतिः परात्मा । तत्पूजनोपकरणान्यखिलेन्द्रियाणि कृत्वा तमेव शरणं व्रज नेतरान्यामिति ॥ ६२ ॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ॥
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥

इत्येतत्ते तुभ्यं ज्ञानमाख्यातं कथितं गुह्याद् गोप्याद् गुह्यतरमतिशयेन गुह्यं रहस्यमित्यर्थः । मया सर्वज्ञेनेश्वरेण विमृश्य विमर्शनमालोचनं कृत्वैतद्यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं चार्थजातं यथेच्छसि तथा कुरु ॥ ६३ ॥

आ० टी० । शास्त्रमुपसंहर्तुमिच्छन्नाह **इति ते ज्ञानमिति** । ज्ञानं करणव्युत्पत्त्या गीताशास्त्रम्, यथेच्छसि तथा कुरु, ज्ञानं कर्माप्युपदिष्टं तदनुतिष्ठेत्यर्थः ॥ ६३ ॥

प० टी० । अथ सर्वगीतार्थमुपसंहरन्नाह इतीति । इत्येवं प्रकारेण ते तुभ्यं मया करुणार्णवेन ज्ञानमात्मविवेकरूपमाख्यातम् । किंभूतं गुह्यान्मन्त्रादिरहस्यादपि गुह्यं गोप्यतमम् । एतदशेषेण पूर्वापरवाक्यानुसंधानपूर्वकं विमृश्य विचार्य यथेच्छसि मोक्षमार्गमपेक्षसे तथैवोक्तमुपायं कुरु ॥६३॥

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ॥
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

तथा भूयोऽपि मयोच्यमानं शृणु सर्वगुह्यतमं सर्वगुह्येभ्योऽत्यन्तगुह्यतमं रहस्यमुक्तमप्यसकृद्भूयः पुनः शृणु मे मम परमं प्रकृष्टं वचो वाक्यं न भयात् नाप्यर्थकारणाद्वा वक्ष्यामि तर्हीष्टः प्रियोऽसि मे मम दृढमव्यभिचारेणेति कृत्वा ततस्तेन कारणेन वक्ष्यामि कथयिष्यामि ते तव हितं परं ज्ञानप्राप्तिसाधनम् तद्धि सर्वहितानां हिततमम् ॥ ६४ ॥

आ० टी० । गीताशास्त्रस्य पौर्वापर्येण विमर्शनद्वारा तात्पर्यार्थं प्रतिपत्तुमसमर्थं प्रत्याह भूयोऽपीति । किमर्थमिच्छन् पुनः पुनरभिदधामीत्याशङ्क्याह **न भयादिति** । हितमिति साधारणनिर्देशे कथं परमित्यादिविशेषणमित्याशङ्क्याह तद्धीति ॥ ६४ ॥

प० टी० । अथोक्तप्रकारेणोपायं कर्तुमशक्तमर्जुनं प्रति परमकारुणिकः परमात्मा संक्षेपेण सर्वगीतार्थसारं वक्तुमुपक्रमते **सर्वगुह्यतममिति** त्रिभिः । सर्वेभ्यो गुह्येभ्योऽपि परमं गुह्यतमं वक्ष्यमाणं मे वचः शृणु । न त्वसंगादासीनस्य परमात्मनस्तव मयि कथमेतावान्ममतानुबन्ध इत्याह **इष्ट इति** । यतस्त्वं दृढमतिर्दृढसंकल्प इति मे इष्टोऽभीष्टः संमतोऽसि ततस्तेन कारणेन ते हितमुपकारं वक्ष्यामि ॥ ६४ ॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥

किं तदित्याह मदिति । मन्मना भव मच्चित्तो भव मद्भक्तो भव मद्भजनो भव मद्याजी मयि यजनशीलो भव मां नमस्कुरु नमस्कारमपि ममैव

कुरु । तत्रैवं वर्तमानो वासुदेवएव सर्वसमर्पितसाध्यसाधनप्रयोजनो मामेवै-ष्यस्यागमिष्यसि सत्यं ते तव प्रतिजाने सत्यां प्रतिज्ञां करोम्येतास्मिन्वस्तुनी-त्यर्थो यतः प्रियोऽसि मे । एवं भगवतः सत्यप्रतिज्ञत्वं बुध्वा भगवद्भक्तेरवश्य-म्भाविमोक्षफलमवधार्य भगवच्छरणैकपरायणो भवेदिति वाक्यार्थः ॥ ६५ ॥

आ० टी० । तदेव प्रश्नद्वारा विवृणोति **किं तदित्यादिना** । उत्तरार्धं व्याचष्टे **तत्रेति** । एवमुक्तया रीत्या वर्तमानस्त्वं तस्मिन्नेव वासुदेवे भगवत्यर्पितसर्वभावो मामेवागमिष्यसीति संबन्धः । सत्यप्रतिज्ञाकरणे हेतुमाह **यत इति** । इदानीं वाक्यार्थं श्रेयोऽर्थिनां प्रवृत्त्युपयोगित्वेन संगृह्णाति **एवमिति** ॥ ६५ ॥

प० टी० । तत्किमित्याह **मन्मना इति** । यदान्तर्दृष्टिर्भवसि तदा मन्मना अहमेव मनसि यस्यासौ मन्मना न विषयान्तरम् । चित्तभित्तौ चित्रन्यस्तमिव मां कुर्वित्यर्थः । बाह्यदृष्टौ भक्तो भव नवप्रकारभक्तियुक्तो भव । कर्मणि क्रियमाणे मद्याजी मद्यजनशीलो भव । तत्र कर्माङ्गदेवतास्वन्तर्या-मित्वेन स्थितं मामेव नमस्कुरु । अनेनोपायेन मामेवैष्यसि प्राप्स्यसीति न प्ररोचनामात्रं किं तु सत्यं यथा तथा प्रतिजाने प्रतिज्ञां करोमि यतस्त्वं मद्रूपत्वान्मे प्रियोऽसि परमप्रेमास्पदमसि ॥ ६५ ॥

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ॥
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

कर्मयोगनिष्ठायाः परमरहस्यमीश्वरशरणतामुपसंहृत्याथेदानीं कर्मयोग-निष्ठाफलं सम्यग्दर्शनं सर्ववेदान्तविहितं वक्तव्यमित्याह सर्वधर्मान् सर्वे च ते धर्माश्च सर्वधर्मास्तान् धर्मशब्देनात्राधर्मोऽपि गृह्यते नैष्कर्म्यस्य विवक्षित-त्वात् "नाविरतो दुश्चरिताद्विमुच्यते" इति "त्यज धर्ममधर्मं चेत्यादिश्रुतिस्मृ-तिभ्यः सर्वधर्मान् परित्यज्य संन्यस्य सर्वकर्माणीत्येतन्मामेकं सर्वात्मानं सर्वभूत-स्थमीश्वरमच्युतं गुरुं जन्ममरणविवर्जितमहमेवेत्येवमेकं शरणं व्रज न मत्तो-ऽन्यदस्तीत्यवधारयेत्यर्थः । अहं तु त्वामेवं निश्चितबुद्धिं सर्वपापेभ्यः सर्वधर्मा-धर्मबन्धनरूपेभ्यो मोक्षयिष्यामि स्वात्मभावप्रकाशीकरणेन । उक्तं च 'नाशया-म्यात्मभावस्थो ज्ञानदीपेन भास्वता' इत्यतो मा शुचः शोकं मा कार्षी-रित्यर्थः ॥ ६६ ॥

आ० टी । वृत्तमनूद्यानन्तरश्लोकतात्पर्यमाह **कर्मयोगेति** । धर्मविशेषणादधर्मानुज्ञां वारयति **धर्मेति** । ज्ञाननिष्ठेन मुमुक्षुणा धर्माधर्मयोस्त्याज्यत्वे श्रुतिस्मृती उदाहरति **नाविरत इति** । मामेक-**मित्यादेस्तात्पर्यमाह न मत्तोऽन्यदिति** । अर्जुनस्य क्षत्रियत्वादुक्तसंन्यासद्वारा ज्ञाननिष्ठायां मु-ख्यानधिकारेऽपि तं पुरस्कृत्याधिकारिन्यस्तस्योपदिदिक्षुत्वादविरोधमभिप्रेत्याह **अहं त्वेति** । उक्तेऽर्थे दाशमिकं वाक्यमनुकूलयति **उक्तं चेति** । ईश्वरस्य त्वदीयबन्धननिरसनद्वारा तत्पालयितृत्वान्न ते शोकावकाशोऽस्तीत्याह **अत इति** ॥ ६६ ॥

प० टी० । अतो गुह्यतममाह **सर्वधर्मानिति** । मद्भक्त्यैव सर्वं भविष्यतीति दृढविश्वासेन विधिकैङ्कर्यं त्यक्त्वा मामेकमद्वितीयं शरणं व्रज मदेकशरणो भवैवं वर्तमानस्य कर्मत्यागभवं पापं भविष्यतीत्याह मा शुच इति । शोकं मा कार्षीर्यतोऽहं त्वां मदेकशरणं सर्वपापेभ्यो मोचयिष्यामि यथा घनैकशरणस्य चातकस्य घनादेवाभीष्टसिद्धिरित्यर्थः । अनेन स्वसामर्थ्यातिशयो दर्शितः, एतदर्थेऽस्माभिः पूर्वं व्याख्यातम्। "अहमेव स्वयमिदं वदामि" इति श्रुतिरपि दर्शिता, यद्वा पूर्वश्लोके सेव्यसेवकभावत्वेन मन्मना भवेत्यादयो मत्प्रापकाश्चत्वारो धर्माः प्रोक्तास्तान् सर्वधर्मान् परित्यज्यार्वागेवमुक्त्वा ततो मामेकमखण्डैकरसं शरणं व्रज मज्ज्ञानात्सकलविकाररहित्येन मदाकारतां भजैवं जाते सत्यहमात्मैव अयमहमिति भेदभावनोद्भूतेभ्यः पापेभ्यो दुःखहेतुभ्यो मोचयिष्यामि, तदुक्तम्—'दग्धाखिलविकारश्चेद् ब्रह्मज्ञानाग्निना मुनिः। वर्तमानः श्रुतेर्मूर्ध्नि नैव स्याद्विधिकिंकर' इति मा शुचः, अनन्तरं शोकः क्वास्तीत्यर्थः । तदुक्तम्—स्वान्तैकान्तमुपागते यदुपतौ शान्त्या समं क्रीडितुं निर्यातं बहिरन्तरङ्गगतिभिस्तत्राष्टभिः सात्त्विकैः । प्राणापानगती मनागुपरते स्वानन्दपूर्णं मनः श्रुत्वा गानमनाहतध्वनिभवं न त्वं न चाहं जगत् ॥१॥ एतदर्थे—"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः" इति श्रुतिः पूर्वं सभाष्या दर्शिता ॥ ६६ ॥

तात्पर्यनिर्णायकं भाष्यम् ।

अस्मिन् हि गीताशास्त्रे परं निःश्रेयससाधनं निश्चितं किं ज्ञानं किं कर्म वाहोस्विदुभयमिति कुतः संदेहः[1] 'यज् ज्ञात्वामृतमश्नुते, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इत्यादीनि वाक्यानि केवलाज् ज्ञानान्निःश्रेयसप्राप्तिं दर्शयन्ति, 'कर्मण्येवाधिकारस्ते' 'कुरु कर्मैवेत्येवमादीनि कर्मणामवश्यकर्तव्यतां दर्शयन्ति । एवं ज्ञानकर्मणोः कर्तव्यतोपदेशात् समुच्चितयोरपि निःश्रेयसहेतुत्वं स्यादिति भवेत् संशयः । किं पुनरत्र मीमांसाफलम् । नन्वेतदेवैषामन्यतमस्य परमनिःश्रेयससाधनत्वावधारणम्, अतो विस्तीर्णतरं मीमांस्यमेतदात्मज्ञानस्य तु केवलस्य निःश्रेयसहेतुत्वं भेदप्रत्ययनिवर्तकत्वेन कैवल्यफलावसानत्वात् क्रियाकारकफलभेदबुद्धिरविद्ययात्मनि नित्यप्रवृत्ता मम

आ० टी० । पूर्वापरालोचनातो गीताशास्त्रं व्याख्यायोपसंहृत्य तत्तात्पर्यार्थं निर्धारितमपि विचारद्वारा निर्धारयितुं विचारमवतारयति **अस्मिन्निति** । किंशब्दार्थमेव त्रेधा विभजते **ज्ञानमिति** । निमित्ताभावे संशयस्याभासत्वान्न निरस्यतामिति मत्वा पृच्छति **कुत इति** । तत्तदर्थावद्योतकानेकवाक्यदर्शनं तन्निमित्तमित्याह **यज् ज्ञात्वेति** । कर्मणामवश्यकर्तव्यत्वोपलम्भात्तेभ्योऽपि निःश्रेयसप्राप्तिर्भातीत्याह **कर्मण्येवेति** । तथापि समुच्चयप्रापकं नास्तीत्याशङ्क्याह **एवमिति** । सत्यां सामग्र्यां कार्यमवश्यंभावीत्युपसंहरति **इति भवेदिति** । संदिग्धं सफलं च विचार्यमिति स्थिते सति फलं संदिग्धमपि न विचार्यमिति बुद्ध्या पृच्छति **किं पुनरिति** । प्रत्येकं ज्ञानकर्मणोः समुच्चितयोर्वा मुक्तिं प्रति परमसाधनतेत्यवधारणमेव विचारफलमिति परिहरति **नन्विति** । संदेहप्रयोजनयोर्विचारप्रयोजकयोर्भावात् विचारद्वारा परममुक्तिसाधनं निर्धारणीयमिति निगमयति **अत इति** । एवं विचारमवतार्य सिद्धान्तं संगृह्णाति **आत्मेति** । संग्रहवाक्यं विवृण्वन्नादावात्मज्ञानापोह्यामविद्यां दर्शयति **क्रियेति** । आश्रयोक्त्या तदनादित्वमाह **आत्मनीति** । तामेवाविद्यामनाद्यविद्योत्थामनर्थात्मिकां प्रपञ्च-

[1] संशयः—पा० लि० १ पु० ।

कर्ताहं कर्तामुष्मै फलायेदं कर्म करिष्यामीतीयमविद्यानादिकालप्रवृत्ता, अस्या अविद्याया निवर्तकमयमहमस्मि केवलोऽकर्ताक्रियोऽफलो न मत्तोऽन्योऽस्ति कश्चिदित्येवंरूपमात्मविषयं ज्ञानमुत्पद्यमानं कर्मप्रवृत्तिहेतुभूताया भेदबुद्धेर्निवर्तकत्वात् । तुशब्दः पक्षद्वयव्यावृत्त्यर्थो न केवलेभ्यः कर्मभ्यो न च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिरिति पक्षद्वयं निवर्तयति । अकार्यत्वाच्च निःश्रेयसस्य कर्मसाधनत्वानुपपत्तिः, न हि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते, केवलज्ञानमप्यनर्थकं तर्हि नाविद्यानिवर्तकत्वे सति दृष्टकैवल्यफलावसानत्वादविद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफलावसानत्वं रज्ज्वादिविषये सर्पाद्यज्ञानतमसो निवर्तकप्रदीपप्रकाशफलवद् विनिवृत्तसर्पादिविकल्परज्जुकैवल्यावसानं हि प्रकाशफलं ज्ञानं तथा दृष्टार्थानां च छिदिक्रियाग्निमन्थनादीनां व्यापृतकर्त्रादिकारकाणां द्वैधीभावाग्निदर्शनादिफलादन्यफले कर्मान्तरे वा व्यापारानुपपत्तिर्यथा तथा ज्ञाननिष्ठा क्रियायां सुदृष्टार्थायां व्यापृतस्य ज्ञात्रादिकारकस्यात्मकैवल्यफलादन्यफले कर्मान्तरे वा प्रवृत्तिरनुपपन्नेति न ज्ञाननिष्ठा कर्मसहितोपपद्यते, ज्ञाननिष्ठा भुजिक्रियाग्निहोत्रादिक्रियावत् स्यादिति चेन्न कैवल्यफले ज्ञाने क्रियाफलार्थित्वानुपपत्तेः, कैवल्यफले हि ज्ञाने

यति **ममेति** । अनाद्यविद्याकार्यत्वात् प्रवाहरूपेणानादित्वमस्या विवक्षित्वा विशिनष्टि **अनादीति** । तत्र कारणाविद्यानिवर्तकत्वमात्मज्ञानस्योपन्यस्यति **अस्या इति** । ननु नेदमुत्पन्नं ज्ञानं निवर्तयत्यविरोधेनोत्पन्नत्वान्न चानुत्पन्नमलब्धात्मकस्यार्थक्रियाकारित्वाभावात्तत्राह **उत्पद्यमानमिति** । कथं तस्य कारणाविद्यानिवर्तकत्वमित्याशङ्क्य कार्याविद्यानिवर्तकत्वदृष्टेरित्याह **कर्मेति** । आत्मज्ञानस्येत्यादिसंग्रहवाक्ये तुशब्दयोग्यविशेषाभावादानर्थक्यमाशङ्क्याह **तुशब्द इति** । पक्षद्वयव्यावर्तकत्वमेवास्य स्फुटयति **नेत्यादिना** । इतश्च कर्मासाध्यता मुक्तेरित्याह **अकार्यत्वाच्चेति** । "एष नित्यो महिमा" इति श्रुतेर्नित्यत्वेन मोक्षस्याकार्यत्वान्न तत्र हेत्वपेक्षेत्युपपादयति **न हीति** । ज्ञानेनापि मोक्षो न क्रियते चेत्तर्हि केवलमपि ज्ञानं मुक्त्यनुपयुक्तमिति कुतस्तस्य तत्र हेतुत्वधीरित्याशङ्कते **केवलेति** । ज्ञानानर्थक्यं दूषयति **नेति** । तदेव प्रपञ्चयति **अविद्येति** । यदुक्तमविद्यानिवर्तकज्ञानस्य कैवल्यफलावसायित्वं दृष्टमिति तत्र दृष्टान्तमाह **रज्ज्वादीति** । उक्ते विषये तमोनिवर्तकप्रकाशस्य कस्मिन् फले पर्यवसानं तत्राह **विनिवृत्तेति** । प्रदीपप्रकाशस्य सर्पभ्रमनिवृत्तिद्वारा रज्जुमात्रे पर्यवसानवदात्मज्ञानस्यापि तदविद्यानिवृत्त्यात्मकैवल्यावसानमिति दार्ष्टान्तिकमाह **तथेति** । ज्ञात्रादीनां ज्ञाननिष्ठाहेतूनां कर्मान्तरे प्रवृत्तिसंभवात् कर्मसहितैव सा कैवल्यावसायिनीति चेत्तत्राह **दृष्टार्थायामिति** । कर्मसाहित्यं ज्ञाननिष्ठाया दृष्टान्तेन साधयन्नाशङ्कते **भुजीति** । भुजिक्रियाया लौकिक्या वैदिक्याश्चाग्निहोत्रादिक्रियायाः सहानुष्ठानवदग्निहोत्रादिक्रियाया ज्ञाननिष्ठायाश्च साहित्यमित्यर्थः । भुजिफले तृप्त्याख्ये प्राप्तेऽपि स्वर्गादौ तद्धेतौ चाग्निहोत्रादावर्थित्वदृष्टेर्युक्तं तत्र साहित्यं न तथा मुक्तिफलज्ञाननिष्ठालाभे स्वर्गादौ तद्धेतौ वा कर्मण्यर्थित्वं तेन ज्ञाननिष्ठाकर्मणोर्न साहित्यमिति परिहरति **नेत्यादिना** । संग्रहवाक्यं विवृणोति **कैवल्येति** । ज्ञाने फ-

प्राप्ते सर्वतः संप्लुतोदके फले कूपतडागादिक्रियाफलार्थित्वाभाववत् फलान्तरे तत्साधनभूतायां वा क्रियायामर्थित्वानुपपत्तेः, नहि राज्यप्राप्तिफले कर्मणि व्यापृतस्य क्षेत्रमात्रप्राप्तिफले व्यापारोपपत्तिस्तद्विषयं चार्थित्वं, तस्मान्न कर्मणोऽस्ति निःश्रेयससाधनत्वं न च ज्ञानकर्मणोः समुच्चितयोर्नापि ज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षाविद्यानिवर्तकत्वेन च विरोधात्, नहि तमस्तमसो निवर्तकमतः केवलमेव ज्ञानं निःश्रेयससाधनमिति न नित्याकरणे प्रत्यवायाप्राप्तेः कैवल्यस्य च नित्यत्वाद्यत्तावत् केवलज्ञानात् कैवल्यप्राप्तिरित्येतत्तदसत्, यतो नित्यानां कर्मणां श्रुत्युक्तानामकरणे प्रत्यवायो नरकादिप्राप्तिलक्षणः स्यात् । नन्वेवं तर्हि कर्मभ्यो मोक्षो नास्तीत्यनिर्मोक्षप्रसङ्ग एव, नैष दोषो, नित्यत्वान्मोक्षस्य नित्यानां कर्मणामनुष्ठानात् प्रत्यवायस्याप्राप्तिः प्रतिषिद्धस्य चाकरणादनिष्टशरीरानुपपत्तिः काम्यानां च प्रवर्जनादिष्टशरीरानुपपत्तिर्वर्तमानशरीरारम्भकस्य च कर्मणः फलोपभोगक्षये पतितेऽस्मिन् शरीरे देहान्तरोत्पत्तौ च कारणाभावादात्मनो रागादीनां चाकरणात् । स्वरूपाव-

---

ल्वति लब्धे फलान्तरे तद्धेतौ च नार्थितेत्यत्र दृष्टान्तमाह **सर्वत इति** । सर्वत्र संप्लुतं व्याप्तमुदकमिति समुद्रोक्तिस्तत्फलं स्नानादि तस्मिन् प्राप्ते तडागादिनिर्माणक्रियायां तदधीने च स्नानादौ कस्य चिदर्थित्वं तथा प्रकृतेऽपीत्यर्थः । निरतिशयफले ज्ञाने लब्धे सातिशयफले कर्मणि नार्थित्वमित्येतद्दृष्टान्तेन स्फुटयति **न हीति** । कर्मणः सातिशयफलत्वमुक्तमुपजीव्य फलितमाह **तस्मान्नेति** । ज्ञानकर्मणोः साहित्यसंभवमपि पूर्वोक्तं निगमयति **न चेति** । न हि प्रकाशतमसोरिव मिथो विरुद्धयोस्तयोः साक्षादेकस्मिन् फले साहित्यमित्यर्थः । ननु ज्ञानमेव मोक्षं साधयदात्मसहायत्वेन कर्मापेक्षेत करणस्योपकरणापेक्षत्वात्तत्राह **नापीति** । ज्ञानमुत्पत्तौ यज्ञाद्यपेक्षमपि नोत्पन्नं फले तदपेक्षं सोत्पत्तिनान्तरीयकत्वेन मुक्तेस्तन्मात्रायत्तत्वादित्यर्थः । यदुक्तमितिकर्तव्यत्वेन ज्ञानं कर्मापेक्षमिति तत्राह **अविद्येति** । ज्ञानस्याज्ञाननिवर्तकत्वात्तत्र कर्मणो विरुद्धतया सहकारित्वायोगान्न फले तदपेक्षेत्यर्थः । कर्मणोऽपि ज्ञानवदज्ञाननिवर्तकत्वे कथं विरुद्धतेत्याशङ्क्याह **न हीति** । केवलस्य समुच्चितस्य वा कर्मणो मोक्षे साक्षादनन्वये फलितमाह **अत इति** । केवलज्ञानं मुक्तिसाधनमित्युक्तं तन्निषेधयन्नाशङ्कते **नेत्यादिना** । निषेध्यमनूद्य नञर्थमाह **यत्तावदिति** । नित्याकरणे प्रत्यवायाप्राप्तेरिति हेतुं प्रपञ्चयति **यत इति** । ज्ञानवतोऽपि नित्यानुष्ठानस्यावश्यकत्वान्न केवलज्ञानस्य कैवल्यहेतुतेत्यर्थः । कैवल्यस्य च नित्यत्वादित्यस्य व्यावर्त्यं दर्शयति **नन्विति** । यदि नित्यनैमित्तिककर्माणि श्रौतान्यकरणे प्रत्यवायकारीण्यवश्यानुष्ठेयान्येवं तर्हि तेभ्यः समुच्चितेभ्योऽसमुच्चितेभ्यश्च मोक्षो नेत्युक्तत्वात् केवलज्ञानस्य वा तद्धेतुत्वादनिबन्धना मुक्तिर्न सिध्येदित्यर्थः । कैवल्यस्य **चेत्यादि** व्याकुर्वन्ननिर्मोक्षप्रसङ्गं प्रत्यादिशति **नैष दोष इति** । मुक्तेर्नित्यत्वेनायत्नसिद्धेर्न तदभावशङ्केत्युक्तं प्रपञ्चयति **नित्यानामिति** । काम्यकर्मवशादिष्टशरीरापत्तिं शङ्कित्वोक्तं **काम्यानां चेति** । आरब्धकर्मवशात्तर्हि देहान्तरं नेत्याह **वर्तमानेति** । तर्हि देहान्तरं शेषकर्मणा स्यादित्याशङ्क्य कर्माशयस्यैकभविकत्वान्नेत्याह **पतितेऽस्मिन्निति** । रागादिना कर्मान्तरं ततो देहान्तरं च भविष्यतीत्याशङ्क्याह **रागादीनां चेति** । आत्मनः स्वरूपावस्थानमिति संबन्धः । अतीतासङ्ख्यजन्मभेदेष्वर्जितस्य

स्थानमेव कैवल्यमित्ययत्नसिद्धं कैवल्यमिति । अतिक्रान्तानेकजन्मान्तरकृतस्य स्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगानुपपत्तेः क्षयाभाव इति चेन्न, नित्यकर्मानुष्ठानायासदुःखोपभोगस्य तत्फलोपभोगत्वोपपत्तेः प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थत्वं नित्यकर्मणाम्, आरब्धानां चोपभोगेनैव कर्मणां क्षीणत्वादपूर्वाणां च कर्मणामनारम्भेऽयत्नसिद्धं कैवल्यमिति न, "तमेव विदित्वातिमृत्युमेति । नान्यः पन्था विद्यतेऽयनाय" इति विद्याया अन्यः पन्था मोक्षाय न विद्यत इति श्रुतेश्चर्मवदाकाशवेष्टनासंभववदविदुषो मोक्षासंभवश्रुतेर्ज्ञानात् कैवल्यमाप्नोतीति च पुराणस्मृतेरनारब्धफलानां पुण्यानां कर्मणां क्षयानुपपत्तेश्च यथा पूर्वोपात्तानां दुरितानामनारब्धफलानां संभवस्तथा पुण्यानामप्यनारब्धफलानां संभवस्तथा पुराणस्मृतेरनारब्धफलानां स्यात् संभवस्तेषां च देहान्तरमकृत्वा क्षयानुपपत्तौ मोक्षानुपपत्तिः, धर्माधर्महेतूनां च रागद्वेषमोहानामप्युत्पन्नात्मज्ञानादुच्छेदानुपपत्तेर्धर्माधर्मोच्छेदानुपपत्तिः, नित्यानां च कर्मणां पुण्यलोकफलश्रुतेर्वर्णाश्रमाश्च स्वकर्मनिष्ठाः पुण्यलोका भवन्तीत्यादिस्मृतेश्च कर्मक्षयानुपपत्तिः । ये त्वाहुर्नित्यानि कर्माणि दुःखरूपत्वात् पूर्व-

---

कर्मणो नानाफलस्यानारब्धस्य भोगेनाक्षयात् ततो देहान्तरारम्भादेकभविकत्वस्याप्रमाणिकत्वान्न मुक्तेरयत्नसिद्धतेति चोदयति **अतिक्रान्तेति** । नोक्तकर्मनिमित्तं देहान्तरं शङ्कितव्यमित्याह **नेति** । नित्यनैमित्तिककर्माणि श्रौतान्यवश्यमनुष्ठेयानि तदनुष्ठाने च महानायासस्ततो दुःखोपभोगस्तस्योक्तानारब्धकर्मफलभोगत्वोपगमान्न ततो देहान्तरमित्याह **नित्येति** । नित्यादिना दुरितनिवृत्तावप्यविरोधान्न सुकृतनिवृत्तिस्ततो देहान्तरमित्याशङ्क्य सुकृतस्य नित्यादेरन्यत्वेनारब्धत्वे च न्यायविरुद्धस्य तस्यासिद्धत्वात्ततो देहान्तरायोगान्नित्यादेरनन्यत्वे च न तस्य फलान्तरमिति मत्वा यथा प्रायश्चित्तमुपात्तदुरितनिर्वहणार्थं न फलान्तरापेक्षं तथेदं सर्वमपि नित्यादिकर्मोपात्तपापनिराकरणार्थं तस्मिन्नेव पर्यवस्यन्न देहान्तरारम्भकमिति पक्षान्तरमाह **प्रायश्चित्तवदिति** । तथापि प्रारब्धवशादेव देहान्तरं शङ्क्यते नानाजन्मारम्भकाणामपि तेषां यावदधिकारन्यायेन संभवादित्याशङ्क्याह **आरब्धेति** । पूर्वार्जितकर्मणामेव क्षीणत्वेऽपि कानि चित्पूर्वकर्माणि देहान्तरमारभेरन्नित्याशङ्क्याह **अपूर्वेति** । विना ज्ञानं कर्मणैव मुक्तिरिति पक्षं श्रुत्यवष्टम्भेन निराचष्टे **नेत्यादिना** । विद्यतेऽयनायेति श्रुतेरिति संबन्धः । एवकारार्थं विवृण्वन्नित्यादिभागं व्याकरोति **अन्य इति** । "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति" इति श्रुतिमर्थतोऽनुवदति **चर्मवदिति** । श्रौतार्थे स्मृतिं संवादयति **ज्ञानादिति** । किं च त्वदीयन्यायस्यानुग्राह्यमानहीनत्वेनाभासतया पुण्यकर्मणामनारब्धफलानां क्षयाभावे देहान्तरारम्भसंभवान्न ज्ञानं विना मुक्तिरित्याह **अनारब्धेति** । तथाविधानां कर्मणां नास्ति संभावनेत्याशङ्क्याह **यथेति** । अनारब्धफलपुण्यकर्माभावेऽपि कथं मोक्षानुपपत्तिरिति तत्राह **तेषां चेति** । इतश्च कर्मक्षयानुपपत्त्या मोक्षानुपपत्तिरिति तत्राह **धर्मेति** । कर्मणा पितृलोक इति श्रुतिमाश्रित्य कर्मक्षये हेत्वन्तरमाह **नित्यानामिति** । स्मृत्यापि यथोक्तमर्थं समर्थयते **वर्णा इति** । प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टजात्यादिभाजो जन्म प्रतिपद्यत इत्येतदादिपदार्थः । यत्तु नित्यानुष्ठानायासदुःखभोगस्य तत्फलभोगत्वमिति तदिदानीमनुवदति **ये त्विति** । नित्यानुष्ठीयमा-

कृतदुरितकर्मणां फलमेव न तु तेषां स्वरूपव्यतिरेकेणान्यत् फलमस्त्यश्रुतत्वा-ज्जीवनादिनिमित्ते च विधानादिति न, अप्रवृत्तानां च फलदानासंभवाद् दुःखफलविशेषानुपपत्तिः कर्मणां स्यात् । यदुक्तं पूर्वजन्मकृतदुरितानां कर्मणां फलं नित्यकर्मानुष्ठानायासदुःखं भुज्यत इति तदसत्, न हि मरणकाले फलदानायानङ्कुरीभूतस्य कर्मणः फलमन्यदारब्धे जन्मन्युपभुज्यत इत्युपपत्तिः, अन्यथा स्वर्गफलोपभोगायाग्निहोत्रादिकर्मारब्धे जन्मनि नरकफलोपभोगानुपपत्तिर्न स्यात्तस्य दुरितदुःखविशेषफलत्वानुपपत्तेश्च अनेकेषु हि दुरितेषु संभवत्स्वभिन्नदुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु द्वन्द्वरोगादिबाधानिमित्तं दुःखं न हि शक्यते कल्पयितुं नित्यकर्मानुष्ठानायासदुःखमेव पूर्वोपात्तदुरितफलं न शिरसा पाषाणवहनादिदुःखमिति । अप्रकृतं चेदमुच्यते नित्यकर्मानुष्ठानायासदुःखं पूर्वकृतदुरितकर्मफलमिति, कथम्, अप्रसूतफलस्य पूर्वकृतदुरितस्य क्षयो नोपपद्यत इति प्रकृतं तत्राप्रसूतफलस्य कर्मणः फलं नित्यकर्मानुष्ठानायासदुःखमाह भवान्न प्रसूतफलस्येत्यर्थः, सर्वमेव पूर्वकृतं दुरितं तत्प्रसूतफलमेवेति मन्यते भवांस्ततो नित्यकर्मानुष्ठानायासदुःखमेव फलमिति विशेषणमयुक्तं नित्यकर्म-

नान्यायासपर्यन्तानीति शेषः । तथापि नित्यानां काम्यानामिव स्वरूपातिरिक्तं फलमाशङ्क्य विध्युद्देशे तदश्रवणान्मैवमित्याह **न त्विति** । विध्युद्देशे फलाश्रुतौ तत्कामनाया निमित्तस्याभावान्न नित्यानि विधीयेरन्नित्याशङ्क्याह **जीवनेति** । न नित्यानां विध्यसिद्धिरिति शेषः । अनुभाषितं दूषयति **नेत्यादिना** । तदेव विवृण्वन्निषेध्यमनूद्य नञर्थमाह **यदुक्तमिति** । अप्रवृत्तानामित्यादिहेतुं प्रपञ्चयति **न हीति** । कर्मान्तरारब्धेऽपि देहे दुरितफलं नित्यानुष्ठायासदुःखं भुज्यतां कानुपपत्तिरित्याशङ्क्याह **अन्यथेति** । यदुक्तं दुःखफलविशेषानुपपत्तिश्च स्यादिति तदुपपादयति **तस्येति** । संभावितानि तावदनन्तानि संचितानि दुरितानि च नानादुःखफलानि यदि तानि नित्यानुष्ठानायासरूपं दुःखं तन्मात्रफलानिकल्पेरंस्तदा तेष्वेवं कल्प्यमानेषु सत्स्वनित्यस्यानुष्ठितस्यायासमासादयतो यो दुरितकृतो दुःखविशेषो न तत्फलं दुरितफलानां दुःखानां बहुत्वादतो नित्यं कर्म यथाविशेषं तं दुरितकृतदुःखविशेषफलक मित्ययुक्त मित्यर्थः । किं च नित्यानुष्ठानायासदुःखमात्रफलानि चेद्दुरितानि कल्पन्ते तदा द्वन्द्वशब्दितरागादिबाधस्य रोगादिबाधायाश्च दुरितानिमित्तत्वानुपपत्तेः सुकृतफलत्वस्य चासंभवादनुपपत्तिरेवोदीरितबाधायाः स्यादित्याह **द्वन्द्वेति** । इतश्च नित्यानुष्ठानायासदुःखमेव दुरितफलमित्ययुक्तमित्याह **नित्येति** । दुःखमिति न शक्यते कल्पयितुमिति पूर्वेण संबन्धः । यदि तदेव तत्फलं न तर्हि शिरसा पाषाणवहनादिदुःखं दुरितकृतं न च तत्कारणं सुकृतं दुःखस्यातत्कार्यत्वादतस्तदाकस्मिकं स्यादित्यर्थः । नित्यानुष्ठानायासदुःखमुपात्तदुरितफलमित्येतदप्रकृतत्वाच्चायुक्तं वक्तुमित्याह **अप्रकृतं चेति** । तदेव प्रपञ्चयितुं पृच्छति कथमिति । तत्रादौ प्रकृतमाह **अप्रसूतेति** । तथापि कथमस्माकमप्रकृतवादित्वं तत्राह, **तत्रेति** । प्रसूतफलत्वमप्रसूतफलत्वमिति प्राचीनदुरितगतविशेषानुपगमादविशेषेण सर्वस्यैव तस्य प्रसूतफलत्वान्नित्यानुष्ठानायासदुःखफलत्वसंभवान्नाप्रकृतवादितेति शङ्कते **सर्वेति** । पूर्वोपात्तदु-

विध्यानर्थक्यप्रसङ्गश्चोपभोगेनैव प्रसूतफलस्य दुरितकर्मणः क्षयोपपत्तेः । किं च श्रुतस्य नित्यस्य कर्मणो दुःखं चेत् फलं नित्यकर्मानुष्ठानायासादेव तन्न दृश्यते व्यायामादिवत्तदन्यस्येति कल्पनानुपपत्तिः जीवनादिनिमित्ते च विधानान्नित्यानां कर्मणां प्रायश्चित्तवत् पूर्वकृतदुरितफलत्वानुपपत्तिः, यस्मिन् पापकर्मनिमित्ते यद्विहितं प्रायश्चित्तं न तु तस्य पापस्य तत्फलमथ तस्यैव पापस्य निमित्तस्य प्रायश्चित्तं दुःखं फलं जीवनादिनिमित्तमपि नित्यकर्मानुष्ठानायासदुःखं जीवनादिनिमित्तस्यैव तत्फलं प्रसज्येत नित्यप्रायश्चित्तयोर्नैमित्तिकत्वाविशेषात् । किं चान्यन्नित्यस्य काम्यस्य चाग्निहोत्रादेरनुष्ठानायासदुःखस्य तुल्यत्वान्नित्यानुष्ठानायासदुःखमेव पूर्वकृतदुरितस्य फल न तु काम्यानुष्ठानायासदुःखमिति विशेषो नास्तीति तदपि पूर्वकृतदुरितफलं प्रसज्येत, तथा च सति नित्यानां फलाश्रवणात्तद्विधानान्यथानुपपत्तेश्च नित्यानुष्ठानायायसदुःखं पूर्वकृतदुरितफलमित्यर्थापत्तिकल्पना चानुपपन्ना एवंविधानान्यथानुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमानाच्च नित्यानां विरो-

---

रितस्यापि शेषेणारब्धफलत्वे विशेषणानर्थक्यमिति परिहरति **तत इति** । दुरितमात्रस्यारब्धफलत्वेनानारब्धफलस्य तस्योक्तफलविशेषवत्त्वानुपपत्तेरित्यर्थः । पूर्वोपात्तदुरितमारब्धफलं चेद्भोगेनैव तत्क्षयसंभवात्तन्निवृत्त्यर्थं नित्यं कर्म न विधातव्यमिति दोषान्तरमाह **नित्येति** । इतश्च नित्यानुष्ठानायासदुःखं नोपात्तदुरितफलमित्याह **किंचेति** । तदेव स्फोरयति **श्रुतस्येति** । यथा व्यायामगमनादिकृतं दुःखं नान्यस्य दुरितस्येष्यते तत्फलत्वसंभवात्तथा नित्यस्यापि श्रुत्युक्तस्यानुष्ठितस्यायासपर्यन्तस्य फलान्तरानुपगमादनुष्ठानायासदुःखमेव चेत् फलं तर्हि तस्मादेव तद्दर्शनात्तस्य न दुरितफलत्वं कल्प्यं नित्यफलत्वसंभवादित्यर्थः । दुःखफलत्वे नित्यानामननुष्ठानमेव श्रेयः स्यादित्याशङ्क्याह **जीवनादिति** । नित्यानां दुरितफलत्वानुपपत्तौ हेत्वन्तरमाह **प्रायश्चित्तवदिति** । दृष्टान्तं प्रपञ्चयति **यस्मिन्निति** । तथा जीवनादिनिमित्ते विहितानां नित्यानां दुरितफलत्वासिद्धिरिति शेषः । सत्यं प्रायश्चित्तं न निमित्तस्य पापस्य फलं किं तु तदनुष्ठानायासदुःखं तस्य पापस्य फलमिति शङ्कते **अथेति** । प्रायश्चित्तानुष्ठानायासदुःखस्य निमित्तभूतपापफलत्वे जीवनादिनिमित्तमित्याद्यनुष्ठानायासदुःखमपि जीवनादेरेव फलं स्यान्नोपात्तदुरितस्येति परिहरति **जीवनादीति** । प्रायश्चित्तदुःखस्य तन्निमित्तपापफलत्ववज्जीवनादिनिमित्तं कर्म कृतमपि दुःखं जीवनादिफलमित्यत्र हेतुमाह **नित्येति** । इतश्च नित्यानुष्ठानायासदुःखमेवोपात्तदुरितफलमित्याशङ्क्य वक्तुमित्याह **किं चेति** । काम्यानुष्ठानायासदुःखमपि दुरितफलमित्युपगमात् प्रसङ्गस्येष्टत्वमाशङ्क्याह **तथा चेति** । विहितानि तावन्नित्यानि न च तेषु फलं श्रुतं न च विना फलं विधिरतन दुरितनिर्वहणार्थानि नित्यानीत्यर्थापत्त्या तेषु च सा युक्ता काम्यानुष्ठानादपि दुरितनिवृत्तिसंभवादित्यर्थः । किं च नित्यान्यनुष्ठानायासदुःखातिरिक्तफलानि विहितत्वात् काम्यवदित्यनुमानात्तेषां दुरितनिवृत्त्यर्थतेत्याह **एवमिति** । काम्यादिकर्म दृष्टान्तयितुमेवमित्युक्तम् । स्वोक्तिव्याघाताच्च नित्यानुष्ठानाद् दुरितफलभोगोक्तिरयुक्तेत्याह **विरोधाच्चेति** । तदेव प्रपञ्चयति **विरुद्धं चेति** । इदंशब्दार्थमेव विशदयति

धाच्च । विरुद्धं चेदमुच्यते नित्यकर्मण्यनुष्ठीयमानेऽन्यस्य[1] कर्मणः फलं भुज्यत इत्यभ्युपगम्यमाने स एवोपभोगो नित्यस्य कर्मणः फलमिति नित्यस्य कर्मणः फलाभाव इति विरुद्धमुच्यते किं च काम्याग्निहोत्रादावनुष्ठीयमाने नित्यमप्यग्निहोत्रादि तन्त्रेणैवानुष्ठितं भवतीति तदायासदुःखेनैव काम्याग्निहोत्रादिफलमुपक्षीणं स्यात्तन्त्रत्वाद्, अथ काम्याग्निहोत्रादिफलमन्यदेव स्वर्गादि तदनुष्ठानायासदुःखमपि भिन्नं प्रसज्येत, न च तदस्ति दृष्टविरोधात् न हि काम्यानुष्ठानायासदुःखात् केवलनित्यानुष्ठानायासदुःखं भिद्यते, किं चान्यदविहितमप्रतिषिद्धं च कर्म तत्कालफलं न तु शास्त्रचोदितं प्रतिषिद्धं वा तत्कालफलं भवेद्यदि भवेत् तदा स्वर्गादिष्वप्यदृष्टफलशासने चोद्यमो न स्याद् अग्निहोत्रादीनामेव कर्मस्वरूपाविशेषेऽनुष्ठानायासदुःखमात्रेणोपक्षयः काम्यानां च स्वर्गादिमहाफलत्वमङ्गेतिकर्तव्यताद्याधिक्ये त्वसति तत्फलकामित्वमात्रेणेति न शक्यं कल्पयितुं तस्मान्न नित्यानां कर्मणामदृष्टफलाभावः कदाचिदप्युपपद्यते ।

नित्येति । अन्यस्य कर्मणो दुरितस्येति यावत् । **स एवेति** । यदनन्तरं यद्भवति तत्तस्य कार्यमिति नियमादित्यर्थः । इतश्च नित्यानुष्ठाने दुरितफलभोगो न सिध्यतीत्याह **किं चेति** । काम्यानुष्ठानस्य नित्यानुष्ठानस्य च यौगपद्यान्नित्यानुष्ठानायासदुःखेन दुरितफलभोगवत् काम्यफलस्यापि मुक्तत्वसंभवादिति हेतुमाह **तन्त्रत्वादिति** । नित्यकाम्यानुष्ठानयोर्यौगपद्येऽपि नित्यानुष्ठानायासदुःखादन्यदेव काम्यानुष्ठानफलं श्रुतत्वादिति शङ्कते **अथेति** । काम्यानुष्ठानफलं नित्यानुष्ठानायासदुःखाद्भिन्नं चेत्तर्हि काम्यानुष्ठानायासदुःखं नित्यानुष्ठानायासदुःखं च मिथो भिन्नं स्यादित्याह **तदनुष्ठानेति** । प्रसङ्गस्येष्टत्वमाशङ्क्य निराचष्टे **न चेति** । दृष्टविरोधमेव स्पष्टयति **न हीति** । आत्मज्ञानवदग्निहोत्रादीनां मोक्षे साक्षादन्वयो नेत्यत्रान्यदपि कारणमस्तीत्याह **किं चान्यदिति** । तदेव कारणं विवृणोति **अविहितमिति** । यत्कर्म मर्दनभोजनादि तन्न शास्त्रे विहितं निषिद्धं वा तदनन्तरफलं तथानुभवादित्यर्थः । शास्त्रीयं कर्म तु नानन्तरफलमानन्तर्यस्याचोदितत्वादतो ज्ञाने दृष्टफले नादृष्टफलकर्म सहकारि भवति, नापि स्वयमेव दृष्टफले मोक्षे कर्मप्रवृत्तिः क्षमेति विवक्षित्वाह **नत्विति** । शास्त्रीयस्याग्निहोत्रादेरपि फलानन्तर्ये स्वर्गादीनामनन्तरमनुपलब्धिर्विरुध्येत ततस्तेष्वपि तथाविधफलापेक्षया प्रवृत्तिरग्निहोत्रादिषु न स्यादित्याह **तदेति** । किं च नित्यानामग्निहोत्रादीनां नादृष्टफलं तेषामेव काम्यानां तादृक्फलं न च हेतुं विना तद्विभागो भावीत्याह **अग्निहोत्रादीनामिति** । **फलकामित्वमात्रेणेति** । न स्यादिति पूर्वेण संबन्धः । यानि नित्यान्यग्निहोत्रादीनि यानि च काम्यानि तेषामुभयेषामेव कर्मस्वरूपविशेषाभावेऽपि नित्यानां तेषामनुष्ठानायासदुःखमात्रेण क्षयो न फलान्तरमस्ति, तेषामेव काम्यानामङ्गाद्याधिक्याभावेऽपि फलकामित्वमधिकारिण्यस्तीत्येतावन्मात्रेण स्वर्गादिमहाफलत्वमित्ययं विभागो न प्रमाणवानित्यर्थः । उक्तविभागायोगे फलितमाह **तस्मान्नेति** ।

---

[1] कर्मणानुष्ठीयमानेनान्यस्य—पा० क्वचित् ।

अतश्चाविद्यापूर्वकस्य कर्मणोऽविद्यैव शुभस्याशुभस्य वा क्षयकारणमशेषतो न नित्यकर्मानुष्ठानमविद्याकामबीजं हि सर्वमेव कर्म, तथाचोपपादितम् अविद्-द्विषया सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा उभौ तौ न विजानीतो वेदाविनाशिनं नित्यं ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामज्ञानां कर्मसङ्गिनां तत्त्ववित्तु गुणा गुणेषु वर्तन्त इति मत्त्वा न सज्जते सर्वकर्माणि मनसा संन्यास्यास्ते नैव किंचित् करोमीति युक्तो मन्येत तत्त्वविदर्थादज्ञः करोमीत्यारुरुक्षोः कर्मकारणमारूढस्य योगस्थस्य शम एव कारणमुदारास्त्रयोऽप्यज्ञा ज्ञानी त्वात्मैव मे मतमज्ञाः कर्मिणो गतागतं कामकामा लभन्ते अनन्याश्चिन्तयन्तो मां नित्ययुक्ता यथोक्तमात्मा-नमाकाशकल्पमकल्मषमुपासते ददामि बुद्धियोगं तं येन मामुपयान्ति ते अर्थान्न कर्मिणोऽज्ञा उपयान्तीति भगवत्कर्मकारिणो ये युक्ततमा अपि कर्मिणोऽज्ञास्ते उत्तरोत्तरहीनफलत्यागावसानसाधना अनिर्देश्याक्षरोपासकास्त्वद्वेष्टा सर्वभूता-

---

काम्यवन्नित्यानामपि पितृलोकाद्यदृष्टफलवत्त्वे दुरितनिवृत्त्यर्थत्वायोगादर्थेनात्मविद्यैवाभ्युपगन्तव्येत्याह **अतश्चेति** । शुभाशुभात्मकं कर्म सर्वमविद्यापूर्वकं चेदशेषतस्तर्हि तस्य क्षयकारणं विद्येत्युपपद्यते न तत् सर्वं कर्माविद्यापूर्वकमिति सिद्धमित्याशङ्क्याह **अविद्येति** । तत्र हिशब्दद्योतितां युक्तिं दर्शयति **तथेति** । इतश्चाविद्वद्विषयं कर्मेत्याह **अविद्वादिति** । अधिकारिभेदेन निष्ठाद्वयमित्यत्र वाक्योपक्रममनुकूलयन्नात्मनि कर्तृत्वं कर्मत्वं वारोपयन् न जानात्यात्मानमिति वदता कर्म ज्ञानमूलमिति दर्शितमित्याह **उभाविति** । आत्मानं याथातथ्येन जानन् कर्तृत्वादिरहितो भवतीति ब्रुवता कर्मसंन्यासे ज्ञानवतोऽधिकारित्वं सूचितमित्याह **वेदेति** । निष्ठाद्वयमधिकारिभेदेन बोद्धव्यमित्यत्रैव वाक्यान्तरमाह **ज्ञानेति** । न बुद्धिभेदं जनयेदित्यत्र चाविद्यामूलत्वं कर्मणः सूचयता कर्मनिष्ठा विद्वद्विषयानुमोदितेत्याह **अज्ञानामिति** । यदुक्तं विद्वद्विषया संन्यासपूर्विका ज्ञाननिष्ठेति तत्र तत्त्ववित्तु महाबाहो गुणकर्मविभागयोरित्यादि वाक्यसमुदाहरति **तत्त्ववित्त्विति** । तत्रैव वाक्यान्तरं पठति **सर्वेति** । विदुषो, ज्ञाननिष्ठेत्यत्रैव पाञ्चमिकं वाक्यान्तरमाह **नैवेति** । तत्रैवार्थसिद्धमर्थं कथयति **अज्ञ इति** । मन्यत इति संबन्धः । अज्ञस्य चित्तशुद्ध्यर्थं कर्म शुद्धचित्तस्य कर्मसंन्यासो ज्ञानप्राप्तौ हेतुरित्यत्र वाक्यान्तरमाह **आरुरुक्षोरिति** । यथोक्तविभागे साप्तमिकं वाक्यमनुगुणमित्याह **उदारा इति** । एवं त्रयीधर्ममित्यादि नावमिकं[1] वाक्यमविद्वद्विषयं कर्मेत्यत्र प्रमाणयति **अज्ञा इति** । विदुषः संन्यासपूर्विका ज्ञाननिष्ठेत्यत्रैव नावमिकं वाक्यान्तरमाह **अनन्या इति** । मामित्येतद्व्याचष्टे **यथोक्तमिति** । तेषां सततयुक्तानामित्यादि दाशमिकं वाक्यं तत्रैव प्रमाणयति **ददामीति** । विद्यावतामेव भगवत्प्राप्तिनिर्देशादितरेषां तदप्राप्तिः सूचितेत्यर्थसिद्धमर्थमाह **अर्थादिति** । ननु भगवत्कर्मकारिणां युक्ततमत्वात् कर्मिणोऽपि भगवन्तं यान्तीत्याशङ्क्याह **भगवदिति** । ये मत्कर्मकृदित्यादिन्यायेन भगवत्कर्मकारिणस्ते यद्यपि युक्ततमास्तथापि कर्मिणोऽज्ञाः सन्तो न भगवन्तं सहसा गन्तुमर्हन्तीत्यर्थः । तेषामज्ञत्वे गमकं दर्शयति **उत्तरोत्तरेति** । चित्तसमाधानमारभ्य फलत्यागपर्यन्तं पाठक्रमेणोत्तरोत्तरं हीनसाधनोपादानादभ्यासासमर्थस्य भगवत्कर्मकारित्वाभिधानाद्भगवत्कर्मकारिणाम-

---

१ नवमाध्यायभवमित्यर्थः ।

नामित्यध्यायपरिसमाप्त्युक्तसाधनाः, क्षेत्राध्यायाद्यध्यायत्रयोक्तज्ञानसाधनानां चा-धिष्ठानादिपञ्चहेतुकसर्वकर्मसंन्यासिनामात्मैकत्वाकर्तृत्वज्ञानवतां परस्यां ज्ञान-निष्ठायां वर्तमानानां भगवत्तत्त्वविदामनिष्टादिकर्मफल एवं परमहंसपरिव्रा-जकानामेव लब्धभगवत्स्वरूपात्मैकत्वशरणानां न भवति भवत्येवमन्येषाम-ज्ञानां कर्मिणामसंन्यासिनामित्येष गीताशास्त्रोक्तस्य कर्तव्याकर्तव्यार्थस्य वि-भागः । अविद्यापूर्वकत्वं सर्वस्य कर्मणोऽसिद्धमिति चेन्न ब्रह्महत्यादिलक्षण-वद् यद्यपि शास्त्रावगतं नित्यं कर्म तथाप्यविद्यावत एव भवतीति यथा प्रति-षेधशास्त्रावगतमपि ब्रह्महत्यादिलक्षणं कर्मानर्थकारणमविद्याकामादिदोषतो भ-वत्यन्यथा प्रवृत्त्यनुपपत्तेस्तथा नित्यनैमित्तिककाम्यान्यपीति । व्यतिरिक्तात्म-न्यज्ञाने प्रवृत्तिर्नित्यादिकर्मस्वनुपपन्नेति चेन्न, चलनात्मकस्य कर्मणोऽनात्म-कर्तृकस्याहंकरोमीति प्रवृत्तिदर्शनात् । देहादिसंघातेऽहंप्रत्ययो गौणो न मिथ्ये-ति चेन्न, तत्कार्येष्वपि गौणत्वोपपत्तेरात्मीये देहादिसंघातेऽहंप्रत्ययो गौणो य-थात्मीयपुत्रे आत्मा वै पुत्रनामासीति, लोके चापि मम प्राण एवायं गौरिति तद्वत्,

---

ज्ञत्वं विज्ञातमित्यर्थः । ये त्वक्षरमनिर्देश्यमित्यादिवाक्यावष्टम्भेन विद्वद्विषयत्वं संन्यासपूर्वकज्ञाननि-ष्ठायां निर्धारयति **अनिर्देश्येति** । उक्तसाधनास्तु संन्यासपूर्वकज्ञाननिष्ठायामधिक्रियेरन्निति शेषः । किं च त्रयोदशे यान्यमानित्वादीनि चतुर्दशे च प्रकाशं च प्रवृत्तिं चेत्यादीनि पञ्चदशे च यान्यसङ्ग-त्वादीन्युक्तानि तैः सर्वैः साधनैः सहिता भवन्त्यनिर्देश्याक्षरोपासकास्ततोऽपि ते ज्ञाननिष्ठायामेवाधि-क्रियेरन्नित्याह **क्षेत्रेति** । निष्ठाद्वयमधिकारिभेदेन प्रतिष्ठाप्य ज्ञाननिष्ठानामनिष्टमिष्टं मिश्रितमिति त्रिविधं कर्मफलं न भवति किं तु मुक्तिरेव कर्मनिष्ठानां तु त्रिविधं कर्मफलं न मुक्तिरिति शास्त्रार्थ-विभागमभिप्रेतमुपसंहरति **अधिष्ठानादीति** । यदुक्तमविद्याकामबीजं सर्वं कर्मेति तत्र शास्त्रावगत-स्य कर्मणोऽविद्यापूर्वकत्वानुपपत्तेरित्याक्षिपति **अविद्येति** । दृष्टान्तेन समाधत्ते **नेति** । तत्राभिमत-प्रतिज्ञां विभजते **ब्रह्महत्येति**[1] । उक्तं दृष्टान्तं व्याचष्टे **यथेति** । अविद्यादिमतो ब्रह्महत्यादि कर्मेत्य-त्र हेतुमाह **अन्यथेति** । दार्ष्टान्तिकं गृह्णाति **तथेति** । तान्यप्यविद्यादिमतो भवन्तीत्यविद्यादिपूर्वक-त्वं तेषामेषितव्यमित्यर्थः । पारलौकिकमसद्देहाद्यतिरिक्तात्मज्ञानं विना प्रवृत्त्ययोगान्न तेषामविद्यापूर्वक-तेति शङ्कते **व्यतिरिक्त इति** । सत्यपि व्यतिरिक्तात्मज्ञाने पारमार्थिकात्मज्ञानाभावान्मिथ्याज्ञानादेव नित्यादिकर्मसु प्रवृत्तेरविद्यापूर्वकत्वं तेषामप्रतिहतमिति परिहरति **नेत्यादिना** । कर्मणश्चलनात्मकत्वान्ना-त्मकर्तृकत्वं तस्य निष्क्रियत्वाद् देहादिसंघातस्य तु सक्रियत्वात्तत्कर्तृकं कर्म युक्तं तथापि संघातेऽहं ममाभिमानद्वाराहं करोमीत्यात्मनो मिथ्याधीपूर्विका कर्मणि प्रवृत्तिर्दृष्टा तेनाविद्यापूर्वकत्वं तस्य युक्त-मित्यर्थः । यदुक्तं देहादिसंघातेऽहमभिमानस्य मिथ्याज्ञानत्वं तदाक्षिपति **देहादीति** । अहंधियो गौणत्वे तत्पूर्वककर्मस्वपि गौणत्वापत्तेरात्मनोऽनर्थाभावात्तन्निवृत्त्यर्थं हेत्वन्वेषणं न स्यादिति दूषय-ति **नेति** । एतदेव प्रपञ्चयन्नादौ चोद्यं प्रपञ्चयति **आत्मीयेति** । तत्र श्रुत्यवष्टम्भेन दृष्टान्तमाह **यथेति** । दर्शितश्रुतेरात्मीये पुत्रेऽहंप्रत्ययो गौणस्तथा संघातेऽप्यात्मीयेऽहंप्रत्ययस्तथा युक्त इत्यर्थः । भेदधीपूर्वकत्वं गौणधियो लोके प्रसिद्धमित्याह **लोके चेति** । लोकवेदानुगे-

---

१ तत्राभिमतां प्रतिज्ञां विभजते यद्यपीति ।—क्वचित्पाठः ।

नैवं मिथ्याप्रत्ययो मिथ्याप्रत्ययस्तु स्थाणुपुरुषयोरगृह्यमाणविशेषयोर्न गौणप्रत्ययस्य मुख्यकार्यार्थत्वमधिकरणस्तुत्यर्थत्वात्, लुप्तोपमाशब्देन यथा सिंहो देवदत्तोऽग्निर्माणवक इति सिंह इवाग्निरिव क्रौर्यपैङ्गल्यादिसामान्यवत्त्वाद्देवदत्तमाणवकाधिकरणकस्तुत्यर्थमेव न तु सिंहकार्यमग्निकार्यं वा गौणशब्दप्रत्ययनिमित्तं किंचित् साध्यते मिथ्याप्रत्ययकार्यत्वं त्वनर्थमनुभवति गौणप्रत्ययस्य विषयं च जानाति नैवं सिंहो देवदत्तः स्यान्नायमग्निर्माणवक इति, तथा गौणेन देहादिसंघातेनात्मना कृतं कर्म न मुख्येनाहंप्रत्ययविषयेणात्मना कृतं स्यान्न हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्यसिंहाग्निभ्यां कृतं स्यान्न च क्रौर्येण पैङ्गल्येन वा मुख्यसिंहाग्न्योः कार्यं किंचित् क्रियते स्तुत्यर्थेनोपक्षीणत्वात् स्तूयमानौ च जानीतो नाहं सिंहो नाहमग्निरिति न सिंहस्य कर्म ममाग्नेश्चेति तथा न संघातजं कर्म मम मुख्यस्यात्मन इति प्रत्ययो युक्ततरः स्यान्न पुनरहं कर्ता मम कर्मेति । यच्चाहुरात्मीयैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्मा करोतीति न,

---

धेनात्मीये संघातेऽहंधीरपि गौणी स्यादिति दार्ष्टान्तिकमाह **तद्वदिति** । मिथ्याधियोऽपि भेदधीपूर्वकत्वसंभवादात्मीयसंघातेऽहंधियो मिथ्यात्वमेव किं न स्यादित्याशङ्क्याह **नैवमिति** । भेदधीपूर्वकत्वाभावे कथं मिथ्याधीरुदेतीत्याशङ्क्याह **मिथ्येति** अधिष्ठानारोप्ययोर्विवेकाग्रहात्तदुत्पत्तिरित्यर्थः । देहादावहंधियो गौणतेति चोद्ये विवृते तत्कार्येष्वपात्यादिपरिहारं विवृणोति **नेत्यादि** । हेतुभागं विभजते **यथेति** । सिंहो देवदत्त इति वाक्यं देवदत्तः सिंह इवेत्युपमया देवदत्तं क्रौर्याद्यधिकरणं स्तोतुं प्रवृत्तमग्निर्माणवक इत्यपि वाक्यं माणवकोऽग्निरिवेत्युपमया माणवकस्य पैङ्गल्याधिकरणस्य[1] स्तुत्यर्थमेव न तथा मनुष्योऽहमिति वाक्यस्य अधिकरणस्तुत्यर्थता भातीत्यर्थः । देवदत्तमाणवकयोरधिकरणत्वं कथमित्याशङ्क्याह **क्रौर्येति** । किं च गौणशब्दं तत्प्रत्ययं च निमित्तं कृत्वा सिंहकार्यं न किंचिद्देवदत्ते साध्यते नापि माणवके किंचिदग्निकार्यं मिथ्याधीकार्यं त्वनर्थमात्मानुभवत्यतो न देहादावहंधीर्गौणीत्याह **न त्विति** । इतोऽपि देहादौ नाहंधीर्गौणीत्याह **गौणेति** । यो देवदत्तो माणवको वा गौण्या धियो विषयस्तत्परो नैष सिंहो नायमग्निरिति जानाति नैवमविद्वानात्मनः संघातस्य च सत्यपि भेदे सङ्घातस्यानात्मत्वं प्रत्येत्यतो न सङ्घातेऽहंशब्दप्रत्ययौ गौणावित्यर्थः । सङ्घाते तयोर्गौणत्वे दोषान्तरं समुच्चिनोति **तथेति** । तथा सत्यात्मनि कर्तृत्वादिप्रतिभासासिद्धिरिति शेषः । गौणेन कृतं न मुख्येन कृतमित्युदाहरणेन स्फुटयति **न हीति** । यद्यपि देवदत्तमाणवकाभ्यां कृतं कार्यं मुख्याभ्यां सिंहाग्निभ्यां न क्रियते तथापि देवदत्तगतक्रौर्येण मुख्यसिंहस्य माणवकनिष्ठपैङ्गल्येन मुख्याग्नेरिव च सङ्घातगतेनापि जडत्वेनात्मनो मुख्यस्य किंचित् कार्यं कृतं भविष्यतीत्याशङ्क्याह **न चेति** । देहादावहंधियो गौणत्वायोगे हेत्वन्तरमाह **स्तूयमानाविति** । देवदत्तमाणवकयोः सिंहाग्निभ्यां भेदधीपूर्वकं तद्व्यापारवत्त्वाभावधीवदात्मनोऽपि मुख्यस्य सङ्घाताद्भेदधीद्वारा तदीयव्यापारराहित्यमात्मनि **दृष्टं** स्यादित्यर्थः । व्यावर्त्यं दर्शयति **न पुनरिति** । सङ्घातेऽहंधियो मिथ्याधीत्वमपि न तत्कृतमात्मनि कर्तृत्वं किं चात्मीयैर्ज्ञानेच्छाप्रयत्नैरस्य कर्तृत्वं वास्तवमिति मतमनुवदति **यच्चेति** । ज्ञानादिकृतमपि कर्तृत्वं मिथ्याधी-

---

1 पैङ्गल्याश्रयस्येत्यर्थः ।

तेषां मिथ्याप्रत्ययपूर्वकत्वात् मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलज-नितसंस्कारपूर्वका हि स्मृतीच्छाप्रयत्नादयो यथास्मिन् जन्मनि देहादिसंघाताभिमानरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवश्च ततोऽतीतेऽतीततरेऽपि जन्मनीत्यनादिरविद्याकृतः संसारोऽतीतो नागतश्चानुमेयः, ततश्च सर्वकर्मसंन्यासाज् ज्ञाननिष्ठायामात्यन्तिकः संसारोपरम इति सिद्धम् । अविद्यात्मकत्वाच्च देहाभिमानस्य तन्निवृत्तौ देहाद्यनुपपत्तेः संसारानुपपत्तिः देहादिसंघाते आत्माभिमानोऽविद्यात्मकः न हि लोके गवादिभ्योऽन्योऽहं मत्तश्चान्ये गवादय इति जानन् तेष्वहमिति प्रत्ययं मन्यते कश्चिदजानंस्तु मन्यते स्थाणौ पुरुषविज्ञानवद् अविवेकतो देहादिसंघाते कुर्यादहमिति प्रत्ययं नहि विवेकतो जानन् । यस्त्वात्मा वै पुत्रनामासीति पुत्रेऽहंप्रत्ययः स तु जन्यजनकसंबन्धनिमित्तो गौणो गौणेन चात्मना भोजनादिवत् परमार्थकार्यं न शक्यते कर्तुं गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवत् । अदृष्टविषयचोदनाप्रामाण्यादात्मकर्तव्यं गौणैर्देहेन्द्रियात्मभिः क्रियत इति चेन्न, अविद्याकृतात्मकत्वात् तेषां गौणा आ-

कृतमेव ज्ञानं मिथ्याधीकार्यत्वादिति दूषयति **न तेषामिति** । तदेव प्रपञ्चयति **मिथ्येति** । मिथ्याज्ञानं निमित्तं कृत्वा किंचिदिष्टं किंचिदनिष्टमित्यारोप्य तद्द्वारानुभूते तस्मिन् प्रेप्साजिहासाभ्यां क्रियां निर्वर्त्य चेष्टमनिष्टं च फलं भुक्त्वा तेन संस्कारेण तत्पूर्विकाः स्मृत्यादयः स्वात्मनि क्रियां कुर्वन्तीति युक्तं कर्तृत्वस्य च मिथ्यात्वमित्यर्थः । अतीतानागतजन्मनोरिव वर्तमानेऽपि जन्मनि कर्तृत्वादिसंसारस्य वस्तुत्वमाशङ्क्याह **यथेति** । विमतौ कालावविद्याकृतसंसारवन्तौ कालत्वाद्वर्तमानकालवदित्यर्थः । संसारस्याविद्याकृतत्वे फलितमाह **ततश्चेति** । तस्याविद्यकत्वेन विद्यापोह्यत्वे हेत्वन्तरमाह **अविद्येति** । कुतोऽस्याविद्याकृतत्वं धर्माधर्मकृतत्वसंभवादित्याशङ्क्याह **देहादीति** । आत्मनो धर्मादिकर्तृत्वस्याविद्यकत्वान्नाविद्यां विना कर्मिणां देहाभिमानः संभवत्यतश्चात्मनः संघातेऽहमभिमानस्याविद्यया विद्यमानतेत्यर्थः । आत्मनो देहाद्यभिमानस्याविद्यकत्वमन्वयव्यतिरेकाभ्यां साधयन् व्यतिरेकं दर्शयति **न हीति** । अन्वयं दर्शयन् व्यतिरेकमनुवदति **अजानन्निति** । पुत्रे पितुरहंधीवदात्मीये देहादावहंधीर्गौणीत्युक्तमनुवदति **यस्त्विति** । तत्र दृष्टान्तश्रुतगौणात्मविषयत्वमुक्तमङ्गीकरोति **सत्त्विति**। तर्हि देहादावपि तथैव स्वकीये स्यादहंधीर्गौणीत्याशङ्क्याह **गौणेनेति**। न हि स्वकीयेन पुत्रादिना गौणात्मना पितुर्भोजनादिकार्यं क्रियते तथा देहादेरपि गौणात्मत्वे तेन कर्तृत्वादिकार्यमात्मनो न वास्तवं सिद्धमित्यर्थः । गौणात्मना मुख्यात्मनो नास्ति वास्तवं कार्यमित्यत्र दृष्टान्तमाह **गौणेति** । न हि गौणेन सिंहेन देवदत्तेन मुख्यसिंहकार्यं क्रियते नापि गौणाग्निना माणवकेन मुख्याग्निकार्यं दाहपाकादि तथा देहादिना गौणात्मना मुख्यात्मनो न वास्तवं कार्यं कर्तृत्वादि कर्तुं शक्यमित्यर्थः । स्वर्गकामादिवाक्यप्रामाण्याद् आत्मनो देहाद्यतिरेकज्ञानस्य च केवलस्याकर्तृत्वात्तत्कर्तव्यं कर्म गौणैरेव देहाद्यात्मभिः संपाद्य तेन हि सत्येव श्रौतातिरेकज्ञाने देहादावात्मत्वमात्मनो मुख्यं युक्तमिति चोदयति **अदृष्टेति** । न देहादीनामात्मत्वं गौणं तदीयात्मत्वस्याविद्यकत्वेन सिद्धत्वादतो न गौणात्मभिरात्मकर्तव्यं कर्म क्रियते किंतु मिथ्यात्मभिरिति परिहरति **नाविद्येति** । तदेव विवृण्वन्नर्थं स्फुटयति **गौणा इति** । कथं तर्हि देहादिविषयात्मत्वप्रथेत्याशङ्क्याविद्याकृतत्वा-

त्मानो देहेन्द्रियादयः, किं तर्हि मिथ्याप्रत्ययेनैवासङ्गस्यात्मनः सङ्गात्मत्वमापाद्यते तद्भावे भावात्तदभावे चाभावादविवेकिनां ह्यज्ञानकाले बालानां दृश्यते दीर्घोऽहं गौरोऽहमिति। देहादिसंघातेऽहंप्रत्ययो भवति न तु विवेकिनामन्योऽहं देहादिसंघातादिति ज्ञानवतां तत्काले देहादिसंघातेऽहं प्रत्ययो भवति तस्मान्मिथ्याप्रत्ययाभावेऽभावात् तत्कृत एव न गौणः, पृथग् गृह्यमाणविशेषसामान्ययोर्हि सिंहदेवदत्तयोरग्निमाणवकयोर्वा गौणः प्रत्ययः शब्दप्रयोगो वा स्यान्नागृह्यमाणसामान्यविशेषयोः यथा शुक्तिरजतयोः यत्तूक्तं श्रुतिप्रामाण्यादिति न, तत्प्रामाण्यदृष्टविषयत्वात्। प्रत्यक्षादिप्रमाणानुपलब्धे हि विषयेऽग्निहोत्रादिसाध्यसाधनसंबन्धे श्रुतेः प्रामाण्यं न प्रत्यक्षादिविषयेऽदृष्टदर्शनार्थविषयात्वात् प्रामाण्यस्य। तस्मान्न दृष्टमिथ्याज्ञाननिमित्तस्याहंप्रत्ययस्य देहादिसंघाते गौणत्वं कल्पयितुं शक्यं न हि श्रुतिशतमपि शीतोऽग्निरप्रकाशो वेति ब्रुवत् प्रामाण्यमुपैति यदि ब्रूयात् शीतोऽग्निरप्रकाशो वेति तथाप्यर्थान्तरं श्रुतेर्विवक्षितं कल्प्यं प्रामाण्यान्यथानुपपत्तेर्न तु प्रमाणान्तरविरुद्धं स्ववचनविरुद्धं कर्मणो मिथ्याप्रत्ययवत्कर्तृकत्वात्[1] कर्तुरभावे श्रुतेरप्रामाण्यमिति चेन्न ब्र-

---

दिहंतुं विभजते **किं तर्हीति** देहादीनामनात्मनामेव सतामात्मत्व मिथ्याप्रत्ययकृतमित्यत्रान्वयव्यतिरेकावुदाहरति **तद्भाव इति**। उक्ते न्याये शास्त्रीयसंस्कारशून्यानामनुभवं प्रमाणयति **अविवेकिनामिति**। व्यतिरेकेऽपि दर्शिते शास्त्राभिज्ञानामनुभवमनुकूलयति नन्विति। अन्वयव्यतिरेकाभ्यामनुभवानुसारिभ्यां सिद्धमर्थमुपसंहरति **तस्मादिति**। तत्कृत एव देहादावहंप्रत्यय इति शेषः। किं च व्यवहारभूमौ भेदगृहस्य गौणत्वव्यापकत्वात्तस्य प्रकृतेऽभावान्न देहादावंशब्दप्रत्ययौ गौणावित्याह **पृथगिति**। अदृष्टविषयत्वादेनाप्रामाण्यात् कर्तुरात्मनो व्यतिरेकावधारणात्तस्येदहादावहंममाभिमानस्य गौणतेत्युक्तमनुवदति **यत्त्विति**। श्रुतिप्रामाण्यस्याज्ञातार्थविषयत्वान्मानान्तरसिद्धे व्यतिरिक्तात्मनि चोदनाप्रामाण्याभावान्न तदवष्टम्भेन देहादावात्माभिमानस्य गौणतेत्युत्तरमाह **न तदिति**। श्रुतिप्रामाण्यस्यादृष्टविषयत्वं स्पष्टयति **प्रत्यक्षादीति**। अज्ञातार्थज्ञापकं प्रमाणमिति स्थिते न ज्ञाते श्रुतिप्रामाण्यमित्याह **अदृष्टेति**। अज्ञातसाध्यसाधनसंबन्धबोधिनः शास्त्रस्यातिरिक्तात्मन्यौदासीन्ये फलितमाह **तस्मादिति**। अन्वयव्यतिरेकाभ्यां दृष्टो मिथ्याज्ञाननिमित्तो देहादिसङ्घातोऽहंप्रत्ययस्तस्येति यावत्। अन्यविषयत्वाच्चोदनाया अतिरिक्तात्मविषयतेत्युक्तमिदानीं तद्विषयत्वाङ्गीकारेऽपि न तन्निर्वोढुं शक्यं प्रत्यक्षविरोधादित्याह **न हीति**। अपौरुषेयायाः श्रुतेरसंभावितदोषाया मानान्तरविरोधेऽपि प्रामाण्यमप्रत्याख्येयमित्यभिप्रेत्याह **यदीति**। स्वार्थं बोधयन्त्याः श्रुतेरविरोधापेक्षत्वाद्विरुद्धार्थवादित्वे तत्परिहाराय विवक्षितमर्थान्तरमविरुद्धं तस्याः स्वीकर्तव्यं विरोधे तत्प्रामाण्यानुपपत्तेरित्याह **तथापीति**। अविरोधमवधार्य श्रुत्यर्थकल्पना न युक्तेति व्यावर्त्यमाह **न त्विति**। अविद्यावत्कर्तृत्वं कर्मेति त्वयापगमादुत्पन्नायां विद्यायामविद्याभावे तदधीनकर्तुरभावादन्तरेण कर्तारमनुष्ठानासिद्धौ कर्मकाण्डाप्रामाण्यमित्यध्येयनविधिविरोधः[2] स्यादिति शङ्कते **कर्मण इति**। कर्मकाण्डश्रुतेर्विद्योदयात् पूर्वं व्यावहारिकप्रामाण्यस्य तात्त्विकप्रामाण्या-

---

१ मिथ्याप्रयत्नवत्कर्तृकत्वात्—पा० क्वचित्। २ स्वाध्यायोऽध्येतव्य इत्याकारकः।

ह्मविद्यायामर्थवत्त्वोपपत्तेः। कर्मविधिश्रुतिवद् ब्रह्मविद्याविधिश्रुतेरप्रामाण्यप्रसंग इति चेन्न, बाधकप्रत्ययानुपपत्तेर्यथा ब्रह्मविद्याविधिश्रुत्यात्मन्यवगते देहादिसंघातेऽहंप्रत्ययो बाध्यते तथात्मन्येवात्मावगतिर्न कदाचित् केनचित् कथंचिदपि बाधितुं शक्या फलाव्यतिरेकावगतेः यथाग्निरुष्णः प्रकाशश्चेति। न च कर्मविधिश्रुतेरप्रामाण्यं, पूर्वपूर्वप्रवृत्तिनिरोधेनोत्तरोत्तरापूर्वापूर्वप्रवृत्तिजननस्य प्रत्यगात्माभिमुख्यप्रवृत्त्युत्पादनार्थत्वान्मिथ्यात्वेऽप्युपायस्योपेयसत्यतया सत्यत्वमेव स्याद्यथानुवादानां विधिशेषाणां लोकेऽपि बालोन्मत्तादीनां पयआदि पाययितव्ये चूडावर्धनादिवचनं प्रकारान्तरस्थानां च साक्षादेव प्रामाण्यसिद्धिः प्रागात्मज्ञानाद् देहाभिमानप्रत्यक्षादिप्रामाण्यवत्। यत्तु मन्यते स्वयमव्याप्रियमाणोऽप्यात्मा संनिधिमात्रेण करोति तदेव च मुख्यं कर्तृत्वमात्मनो यथा राजा युध्यमानेषु योधेषु युध्यत इति प्रसिद्धं स्वयमयुध्यमानोऽपि संनिधानादेव जितः पराजितश्चेति तथा सेनापतिर्वा नैव करोति क्रियाफलसंबन्धश्च राजसेनापत्तेश्च दृष्टः, यथा च ऋत्विक्कर्म यजमानस्य, तथा देहादीनां कर्मात्मकृतं स्यात् तत्फल-

भावेऽपि संभवाद्ब्रह्मकाण्डश्रुतेश्च तात्त्विकप्रामाण्यस्य ब्रह्मविद्याजनकत्वेनोपपन्नाध्ययनविधिविरोध इति परिहरति **न ब्रह्मेति**। कर्मकाण्डश्रुतेस्तात्त्विकाप्रामाण्याभावे ब्रह्मकाण्डश्रुतेरपि तदसिद्धिरविशेषादिति शङ्कते **कर्मेति**। उत्पन्नाया ब्रह्मविद्याया बाधकाभावेन प्रमाणत्वात्तद्धेतुश्रुतेस्तात्त्विकं प्रामाण्यमिति दूषयति **न बाधकेति**। ब्रह्मविद्याया बाधकानुपपत्तिं दृष्टान्तेन साधयति **यथेति**। देहादिसंघातवदित्यपेरर्थः। लौकिकावगतेरिवात्मावगतेरपि फलाव्यतिरेकमुदाहरणेन स्फोरयति **यथेति**। फलमज्ञाननिवृत्तिः कर्मविधिश्रुतिवदित्युक्तं दृष्टान्तं विघटयति **न चेति**। अनादिकालप्रवृत्तस्वाभाविकप्रवृत्तव्यक्तीनां प्रतिबन्धेन योगाद्यलौकिकप्रवृत्तिव्यक्तीर्जनयति, कर्मकाण्डश्रुतिस्तज्जननं च चित्तशुद्धिद्वारा प्रत्यगात्माभिमुख्यप्रवृत्तिमुत्पादयति, तथा च कर्मविधिश्रुतीनां पारंपर्येण प्रत्यगात्मज्ञानार्थत्वात् तात्त्विकप्रामाण्यसिद्धिरित्यर्थः। नन्वेवमपि श्रुतेर्मिथ्यात्वादाभासवदप्रामाण्यमिति चेन्नेत्याह **मिथ्यात्वेऽपीति**। स्वरूपेणासत्यत्वेऽपि सत्योपेयद्वारा प्रामाण्यमित्यत्र दृष्टान्तमाह **यथेति**। मन्त्रार्थवादेतिहासपुराणानां श्रुतेऽर्थे प्रामाण्याभावेऽपि शेषिविध्यनुरोधेन प्रामाण्यवत् प्रकृतेऽपि श्रुतेः स्वरूपेणासत्याया विषयसत्यतया सत्यत्वं गतायाः प्रामाण्यमविरुद्धमित्यर्थः। वाक्यस्य शेषिविध्यनुरोधेन प्रामाण्यं नालौकिकमित्याह **लोकेऽपीति**। कर्मकाण्डश्रुतीनामुक्तरीत्या परंपरया प्रामाण्येऽपि साक्षात्प्रामाण्यमुपेक्षितमित्याशङ्क्याह **प्रकारान्तरेति**। आत्मज्ञानोदयात् प्रागवस्था प्रकारान्तरं, तत्र स्थितानां कर्मकाण्डश्रुतीनामज्ञातसंबन्धबोधकत्वेन साक्षादेव प्रामाण्यमिष्टमित्यर्थः। ज्ञानात् पूर्वं कर्मश्रुतीनां व्यावहारिकप्रामाण्ये दृष्टान्तमाह **प्रागिति**। प्रतीचि कर्तृत्वस्याविद्यकत्वेऽपि श्रुतिप्रामाण्यमप्रत्यूहमित्युक्तं संप्रति कर्तृत्वस्य प्रकारान्तरेण पारमार्थिकत्वमुत्थापयति **यत्त्विति**। स्वव्यापाराभावे संनिधिमात्रेण कुतो मुख्यकर्तृत्वमित्याशङ्क्य दृष्टान्तमाह **यथेति**। स्वयमयुध्यमानत्वे कथं तत्फलवत्त्वमित्याशङ्क्य प्रसिद्धिवशादित्याह **जित इति**। कायिकव्यापाराभावेऽपि कर्तृत्वस्य मुख्यत्वे दृष्टान्तमाह **सेनापतिरिति**। तस्यापि फलवत्त्वं राजवदविशिष्टमित्याह **क्रियेति**। अन्यकर्मणान्यस्य संनिहितस्य मुख्ये कर्तृत्वे वैदिकमुदाहरणमाह **यथा चेति**। कथमृत्विजां कर्म

स्यात्मगामित्वात्, यथा वा भ्रामकस्य लोहभ्रामयितृत्वादव्यापृतस्यैव मुख्यमेव कर्तृत्वं तथा चात्मन इति तदसत्, अकुर्वतः कारकत्वप्रसङ्गात् । कारकमनेकप्रकारमिति चेन्न, राजप्रभृतीनां मुख्यस्यापि कर्तृत्वस्य दर्शनात् राजा तावत् स्वव्यापारेणापि युध्यते योधानां योधयितृत्वेन धनदानेन च मुख्यमेव कर्तृत्वं तथा जयपराजयफलोपभोगेन, तथा यजमानस्यापि धनत्यागेन दक्षिणादानेन च मुख्यमेव कर्तृत्वं तस्मादव्यापृतस्य कर्तृत्वोपचारो यः स गौण इत्यवगम्यते । यदि मुख्यमन्यत् कर्तृत्वं स्वव्यापारलक्षणं नोपलभ्यते राजयजमानप्रभृतीनां तदा संनिधिमात्रेणापि कर्तृत्वं मुख्यं परिकल्प्येत यथा भ्रामणेन न तथा राजयजमानादीनां स्वव्यापारो नोपलभ्यते तस्मात् संनिधिमात्रेणापि कर्तृत्वं गौणमेव । तथा च सति तत्फलसंबन्धोऽपि गौण एव स्यान्न गौणेन मुख्यं कार्यं निर्वर्त्यते तस्मादसदेवैतद्दीयते देहादीनां व्यापरेणाव्यापृत आत्मा-कर्ता भोक्ता च स्यादिति भ्रान्तिनिमित्तं तु सर्वमुपपद्यते यथा स्वप्ने मायायां चैवं न च देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते । तस्माद् भ्रान्तिप्रत्ययनिमित्त एवायं संसारभ्रमो न तु परमार्थ इति सम्यग्दर्शनादत्यन्तमेवोपरम इति सिद्धम् ।

यजमानस्येत्याशङ्क्याह **तत्फलस्येति** । स्वव्यापाराद्दते संनिधेरेवान्यव्यापारहेतोर्मुख्यकर्तृत्वे दृष्टान्तमाह **यथा वेति** । क्रियां कुर्वत् कारणं कारकमित्यङ्गीकारविरोधान्नैतदिति दूषयति **तदसदिति** । कारकविशेषविषयत्वेनाङ्गीकारोपपत्तिरिति शङ्कते **कारकमिति** । स्वव्यापारमन्तरेण न किंचिदपि कारकमिति परिहरति **न राजेति** । दर्शनमेव विशदयति **राजेति** । यथा राज्ञो युद्धे योधयितृत्वेन धनदानेन च मुख्यं कर्तृत्वं तथा फलभोगेऽपि मुख्यमेव तस्य कर्तृत्वमित्याह **तथेति** । यदुक्तमृत्विक्कर्म यजमानस्येति तत्राह **यजमानस्यापीति** । स्वव्यापारादेव मुख्यं कर्तृत्वमिति स्थिते फलितमाह **यस्मादिति** । तदेव प्रपञ्चयति **यदीति** । तर्हि संनिधानादेव मुख्यं कर्तृत्वं राजादीनामुपगतमिति नेत्याह **न तथेति** । राजादीनां स्वव्यापारवत्त्वे पूर्वोक्तं सिद्धमित्याह **तस्मादिति** । राजप्रभृतीनां संनिधेरेव कर्तृत्वस्य गौणत्वे जयादिफलवत्त्वस्यापि सिद्धं गौणत्वमित्याह **तथा चेति** । तत्र पूर्वोक्तिं हेतुत्वेन स्मारयति **नेति** । अन्यव्यापारेणान्यस्य मुख्यकर्तृत्वाभावे फलितमुपसंहरति **तस्मादिति** । कथं तर्हि त्वयात्मनि कर्तृत्वादि स्वीकृतं न हि वृद्धैस्तदिष्टं कर्ता शास्त्रार्थवत्त्वादिति न्यायात्तत्राह **भ्रान्तीति** । कर्तृत्वाद्यात्मनि भ्रान्तमित्येतदुदाहरणेन स्फोरयति **यथेति** । मिथ्याज्ञानकृतमात्मनि कर्तृत्वादीत्यत्र व्यतिरेकं दर्शयति **न चेति** । उक्तव्यतिरेके फलं कथयति **तस्मादिति** । संसारभ्रमस्याविद्याकृतत्वे सिद्धे परमप्रकृतमुपसंहरति **इति सम्यगिति** ।

इदं ते नातपस्काय नाभक्ताय कदाचन ॥
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥

सर्वं गीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशेषतश्चान्ते इह शास्त्रार्थदार्ढ्याय संक्षेपत उपसंहारं कृत्वाथेदानीं शास्त्रसंप्रदायविधिमाह इदमिति । इदं शास्त्रं ते तव हिताय मयोक्तं संसारविच्छित्तयेऽतपस्काय तपोरहिताय न वाच्यमिति व्यवहितेन संबध्यते तपस्विनेऽप्यभक्ताय गुरुदेवभक्तिरहिताय कदाचन कस्यांचिदप्यवस्थायां न वाच्यं भक्तस्तपस्व्यपि स त्वशुश्रूषुर्यो भवति तस्मा अपि न वाच्यं न च यो मां वासुदेवं प्राकृतं मनुष्यं मत्वाभ्यसूयत्यात्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्वमजानन्न सहतेऽसावप्ययोग्यस्तस्मा अपि न वाच्यं भगवत्यनसूयायुक्ताय तपस्विने भक्ताय शुश्रूषवेऽनसूयवे च वाच्यं शास्त्रमिति सामर्थ्याद्गम्यते तत्र मेधाविने तपस्विने वेत्यनयोर्विकल्पदर्शनाच्छुश्रूषाभक्तियुक्ताय तपस्विने भक्ताय मेधाविने वा वाच्यं शुश्रूषाभक्तिवियुक्ताय न तपस्विने नापि मेधाविने वाच्यं भगवत्यसूयायुक्ताय समस्तगुणवतेऽपिं न वाच्यं गुरुशुश्रूषाभक्तिमते च वाच्यमित्येष शास्त्रसंप्रदायविधिः ॥६७॥

शास्त्रतात्पर्यार्थविचारद्वारा निर्धार्यानन्तरश्लोकमवतारयति **सर्वमिति** । प्रकृते त्वष्टादशाध्याये गीताशास्त्रार्थं सर्वं प्रतिपत्तिसौकर्यार्थमुपसंहृत्यान्ते च सर्वधर्मान् परित्यज्येत्यादौ विषयस्य संक्षेपेणोपसंहारं कृत्वा संप्रदायविधिवचनस्यावसरे सतीदानीमिति योजना । किमिति विस्तरेणोपसंहृतः शास्त्रार्थः संक्षिप्योपसंह्रियते तत्राह **शास्त्रार्थेति** । संक्षेपविस्ताराभ्यामुक्तेऽर्थे सर्वेषां दृढतया बुद्धिमधिरोहतीत्यर्थः । हितायेत्येतदेव व्याचष्टे **संसारेति** । कदाचनेति सर्वैः संबध्यते । प्रतिषेधसामर्थ्यसिद्धमर्थं कथयति **भगवतीति** । अर्थसिद्धेऽर्थे स्मृत्यन्तरमनुसृत्य मेधावित्वमन्तर्भावयति **तत्रेति** । विकल्पदर्शनात्तेषु मेधावित्वमपि प्रविशतीत्यर्थः । विकल्पपक्षे कथमधिकारिप्रतिपत्तिरिति तत्राह **शुश्रूषेति** । ताभ्यां युक्ताय भगवत्यसूयारहिताय तपस्विने वाच्यमिति संबन्धः । तद्युक्ताय शुश्रूषाभक्तियुक्ताय भगवत्यनसूयारहितायेत्यर्थः । तपस्वित्वं मेधावित्वं वा निरपेक्षमधिकारिविशेषणमिति शङ्कां शातयति **शुश्रूषेति** । भगवद्विषयासूयाराहित्ये तात्पर्यं सूचयति **भगवतीति** । कस्मै तर्हि वाच्यमेतदित्याशङ्क्य पूर्वोक्तसर्वगुणसंपन्नायेत्याह **गुरुशुश्रूषेति** । अनुक्तेतरविशेषणोपलक्षणार्थमुभयग्रहणं मेधाविनस्तपस्वित्वं नातीवापेक्षते सर्वमन्यद्बाधकाभावादपेक्षितमेवेति भावः ॥ ६७ ॥

पृ० टी० । एवं गीतार्थतत्त्वमुपदिश्य तत्संप्रदायप्रवर्तने नियममाह **इदमिति** । इदं गीतातत्त्वं ते त्वयातपस्काय स्वधर्मानुष्ठानहीनाय न वाच्यं न वाभक्ताय परमेश्वरभक्तिशून्याय न चाशुश्रूषवे परिचर्यामकुर्वते तथा यो मां परमेश्वरमभ्यसूयति मनुष्यदृष्ट्या दोषारोपेण निन्दति तस्मै न वाच्यम् । श्रुतिरपि नैरुक्ती—“विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि । असूयकायानृजवेऽयताय न मा ब्रूया अवीर्यवती स्याम्” इति । भाष्यम्—विद्या औपनिषद्ध्यात्मविद्या एतद्वक्तुं ब्राह्मणं ब्रह्मनिष्ठं प्रतीत्याभिमुख्येन समक्षं जगाम प्राप्ता । तत्किं मा इति मां त्वं गोपाय । वक्ष्यमाणाय पुरुषायेति चतुर्थ्यां द्वितीयोक्ता । तं पुरुषं प्रति गुप्तं कुरु न कथयेत्यर्थः । यतोऽहं ते शेवधिर्निरवधिरस्मि । चतुर्विधपुरुषार्थसाधनत्वात् । यथा निधिर्गुप्तः क्रियत इत्यर्थः । किंलक्षणायेत्याह । असूयकाय निन्दकाय । अनृजवे सदावक्राय । अयताय नियमशून्याय । मामात्मविद्यां न ब्रूया न कथय । एवं सति यदि ब्रूषे तर्ह्यवीर्यवती स्यां । त्वय्यपि सामर्थ्यं न स्थास्यतीत्यर्थः ॥ ६७ ॥

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

संप्रदायस्य कर्तुः फलमिदानीमाह य इति । य इमं यथोक्तं परमं निःश्रेयसार्थं केशवार्जुनयोः संवादरूपं ग्रन्थं गुह्यं गुप्तं गोप्यतमं मद्भक्तेषु मयि भक्तिमत्स्वभिधास्यति वक्ष्यति ग्रन्थतोऽर्थतश्च स्थापयिष्यतीत्यर्थः । यथा त्वयि मया । भक्ते पुनर्ग्रहणात्तद्भक्तिमात्रेण केवलेन शास्त्रसंप्रदाने पात्रं भवतीति गम्यते । कथमभिधास्यतीत्युच्यते भक्तिं मयि परां कृत्वा भगवतः परमगुरोरच्युतस्य शुश्रूषा मया क्रियत इत्येवं कृत्वेत्यर्थः । तस्येदं फलं मामेवैष्यति मुच्यत एवात्र संशयो न कर्तव्यः ॥ ६८ ॥

आ० टी० । शास्त्रसंप्रदायप्रवृत्त्यर्थमुत्तरश्लोकप्रवृत्तिं दर्शयति **संप्रदायेति** । य इत्यध्यापको निर्दिश्यते । परमत्वं ग्रन्थस्य निरतिशयपुरुषार्थसाधनत्वमित्याह **परममिति** । गोप्यत्वमस्य रहस्यार्थविषयत्वाद्यथोक्तसंवादस्य ग्रन्थतोऽर्थतश्च भक्तेषु स्थापने दृष्टान्तमाह **यथेति** । मयि वासुदेवे भगवति, अनन्यभक्ते त्वयि यथा मया ग्रन्थोऽर्थतः स्थापितस्तथा मद्भक्तेष्वन्येष्वपि यो ग्रन्थमिमं स्थापयिष्यति तस्येदं फलमित्युत्तरत्र संबन्धः । नाभक्तायेति भक्तेरधिकारिविशेषणत्वोक्तेर्मद्भक्तेष्विति पुनर्भक्तिग्रहणमनर्थकमित्याशङ्क्याह **भक्तेरिति** । शुश्रूषादिसहकारिराहित्यं केवलशब्दार्थो, यद्यपि मात्रशब्देन सूचितमेतत्तस्यापीतरेण स्फुटीकृतमिति न विरोधः । प्रश्नपूर्वकमभिधानप्रकारमभिनयति **कथमित्यादिना** । भगवति भक्तिकरणप्रकारं प्रकटयति **भगवत इति** । यच्छब्दापेक्षितं पूरयति **तस्येति** । मामेवैष्यत्येवेत्यन्वयं गृहीत्वा व्याचष्टे **मुच्यत एवेति** ॥ ६८ ॥

प० टी० । एतैर्दोषैर्विरहितेभ्यो भक्तेभ्यो गीताशास्त्रोपदेष्टुः फलमाह **य इति** । य आचार्य इदं परमं गुह्यं गोप्यं गीतार्थतत्त्वं मद्भक्तेषु जिज्ञासया प्राप्तेषु सत्स्वभिधास्यति वक्ष्यति साभिप्रायं निरूपयिष्यति । स मयि जगदीश्वरे परामव्यभिचारिणीं भक्तिं कृत्वासंशयः सन् मामेव प्राप्नोति । आत्माख्यदक्षिणादातुः किमन्यत् फलं वाच्यमित्यर्थः । श्रुतिरपि ऋग्वेदे—" आविरभून्महि माघोनमेषां विश्वं जीवन्तमसो निरमोचि । महिज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि " इति । अत्र रावणभाष्यम् । एषामाचार्याणां माघोनं महि आविरभूत् । इन्दति जानातीति व्युत्पत्त्या मघोन इन्द्रस्य परमात्मन इदं माघोनं महि महत्त्वमाविरभूत् । कुत इत्याह **महीति**। महित्वं ज्योतिर्ज्ञानं च पितृभिरस्माभिर्दत्तं सदागात् प्राप्तं तेष्वाचार्येषु परिणतं येन ज्योतिषा विश्वं जीवं सर्वं जगत् तमसोऽज्ञानान्निरमोचि निर्मोचितम् । अथ कथमस्माभिस्तेभ्य एवार्पितमित्याह तैः उरुर्निरवधिकफलो दक्षिणायाः पन्था मार्गोऽदर्शी दृष्टः । मोक्षार्थिभ्य आत्माख्यदक्षिणाया मार्गस्य फलं निरवधिकमिति ज्ञातमित्यर्थः । अत एव सावधिकफला दक्षिणामग्रिमश्रुत्याह" **उच्चा दिवीति** ॥ ६८ ॥

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥

किंच न च तस्माच्छास्त्रसंप्रदायकृतो मनुष्येषु मनुष्याणां मध्ये कश्चिन्मे मम प्रियकृत्तमोऽतिशयेन प्रियकृत्तमोऽन्यः प्रियकृत्तमो नास्त्येवेत्यर्थो वर्तमानेषु, न च भविता भविष्यत्यपि काले, तस्माद् द्वितीयोऽन्यः प्रियकृत्तरो भुवि लोकेऽस्मिन् भविता ॥ ६९ ॥

आ० टी० । ननु सर्वेषां मुक्तिसाधनानां ध्यानस्य श्रेष्ठत्वात्तन्निष्ठस्य मुमुक्षोर्नास्ति विद्यासंप्रदाने प्रवृत्तिरिति तत्राह **किंचेति** । इतश्च विद्यासंप्रदानं मुमुक्षुणा यथोक्तविशेषणवता कर्तव्यमित्यर्थः । वर्तमानेषु मध्ये त्वत्तोऽन्यो नास्त्येव प्रियकृत्तमो नाप्यतीतेषु तादृक् कश्चिदासीदिति शेषः । तस्माद्विद्यासंप्रदायकर्तुः सकाशादित्यर्थः । ध्याननिष्ठस्य श्रेष्ठत्वेऽपि स्वसंप्रदायप्रवक्तुः श्रेष्ठतमत्वादुचिता विद्यासंप्रदाने प्रवृत्तिरितिभावः ॥ ६९ ॥

प० टी० । अथैतमेवाभिप्रायमाह **न च तस्मादिति** । तस्मान्मदुक्तं गुह्यमात्मतत्त्वं मद्भक्तेभ्यो दातुः पुरुषात्सकाशादन्यः कश्चिदपि मे प्रियकृत्तमो नचास्ति न वर्तते । कालान्तरेऽप्येतादृक्प्रियकरो भुवि न भविता । अनेन बहुजननकृतसुकृतसामग्रीसंनाहव्यतिरेकेणैतादृग्वक्ता न भविष्यतीति तस्य दुर्लभत्वमुक्तम् । तथा सर्वभजनापेक्षयेदं भजनं मम परमप्रीतये भवतीत्यर्थः॥६९॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ॥
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥

योऽप्यध्येष्यते च पठिष्यति य इमं धर्म्यं धर्मादनपेतं संवादरूपं ग्रन्थमावयोस्तेनेदं कृतं स्याज्, ज्ञानयज्ञेन विधिजपोपांशुमानसानां यज्ञानां ज्ञानयज्ञो मानसयज्ञाद्विशिष्टतम इत्यतस्तेन ज्ञानयज्ञेन गीताशास्त्रस्याध्ययनं स्तूयते फलविधिरेव वा देवतादिविषयज्ञानयज्ञफलतुल्यमस्य फलं भवतीति तेनाध्ययनेनाहमिष्टः पूजितः स्यां भवेयमिति मे मम मतिर्निश्चयः ॥ ७० ॥

आ० टी० । संप्रदायप्रवक्तुः सर्वाधिकं फलं स वक्ता विष्णुरित्युक्तो न स विश्वाधिदैवतमिति न्यायेनोक्त्वा संप्रत्यध्येतुर्विवक्षितं फलमाह **योऽपीति** । यथोक्तस्य शास्त्रस्य योऽप्यध्येता तेनेदं कृतं स्यादिति संबन्धः । तदेवाह **अध्येष्यत इति** । तेनेदं कृतमित्यत्रेदंशब्दार्थं विशदयति **ज्ञानेति** । तेनाहमिष्टः स्यामिति संबन्धः । चतुर्विधानां यज्ञानां मध्ये ज्ञानयज्ञस्य 'श्रेयान् द्रव्यमयाद् यज्ञाज् ज्ञानयज्ञः' इति विशिष्टत्वाभिधानात्तेनाहमिष्टः स्यामित्यध्ययनस्य स्तुतिरभिमतेत्याह **विधीति** । पक्षान्तरमाह **फलेति** । फलविधिमेवं प्रकटयति **देवतादीति** । यद्विज्ञानयज्ञस्य फलं कैवल्यं तेन न तुल्यमस्याध्येतुः संपद्यते तच्च देवताद्यात्मत्वमित्यर्थः । कथमध्ययनादेव सर्वात्मकं फलं लभ्यते तस्मात्सर्वमभवदिति श्रुतिस्तत्राह **तेनेति** । तेनाध्येत्रा ज्ञानयज्ञतुल्येनाध्ययनेन भगवानिष्टस्तथा च तज्ज्ञानादुक्तं फलमविरुद्धमित्यर्थः ॥ ७० ॥

प० टी० । अथ गीताशास्त्रस्य पठनफलमाह **अध्येष्यते चेति** । आवयोः कृष्णार्जुनयोरिमं धर्म्यं धर्मादनपेतं संवादं योऽध्येष्यते जपरूपेण पठिष्यति । तस्य जपयज्ञफलेन भवित-

ठ्यम् । परं तु तेन पुंसा सर्वयज्ञेभ्यः श्रेष्ठेन ज्ञानयज्ञेनाहमिष्टः स्यां ज्ञानयज्ञेन संतर्पितो भवेयमिति मे मतिर्मम संमतम् । यद्यप्यसौ गीतार्थमबुध्वाजपि तथापि मत्प्रसादकर एव । यतो गीतारूपछन्दर्षिदेवतायुतो मालामन्त्रः । तत्र छन्दास्यनुष्टुबादीनि, ऋषिर्वेदव्यासः, देवता श्रीकृष्णस्तत्र मन्त्रशब्दार्थस्तु—मन्तारं त्रायतेऽसौ मन्त्र इति व्युत्पत्त्या जपमात्रेणैव सिद्धिदो भवति नहि तत्र मन्त्रार्थो मृग्यते । तथा च यद्देवताको मन्त्रस्तेन मन्त्रेण सा देवता प्रीयते । प्रकृते तु चित्तशुद्धिद्वाराहं प्रीतः सन् स्वरूपं दर्शयामीत्यर्थः ॥ ७० ॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ॥
सोऽपि मुक्तः शुभाँल्लोकान् प्राप्नुयात्पुण्यकर्मणाम् ॥७१॥

अथ श्रोतुरिदं फलं श्रद्धावान् श्रद्दधानोऽनसूयश्चासूयावर्जितः सन्निमं ग्रन्थं शृणुयादपि यो नरोऽपिशब्दात् किमतोऽर्थज्ञानवान् सोऽपि पापान्मुक्तः शुभाँल्लोकान् प्राप्नुयात् पुण्यकर्मणामग्निहोत्रादिकर्मवताम् ॥ ७१ ॥

आ० टी० । प्रवक्तुरध्येतुश्च फलमुक्त्वा श्रोतुरिदानीं फलं कथयाति **अथेति** ॥ ७१ ॥

प० टी० । अथ श्रवणफलमाह । **श्रद्धावानिति** । यो नरः श्रद्धायुक्तः सन् केवलं शृणुयादपि कश्चित्किमर्थमयमुच्चैर्जपत्यबद्धं वेति दोषदृष्ट्या शृणोति तन्निवृत्त्यर्थमाह **अनसूयश्चेति** । असूयारहितः शृणुयात्सोऽपि सर्वैः पापैर्मुक्तः सन्नश्वमेधादिपुण्यकृतां लोकान् प्राप्नुयात् ॥ ७१ ॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ॥
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ ७२ ॥

शिष्यस्य शास्त्रार्थग्रहणविवेकबुभुत्सया पृच्छति तद्ग्रहणे ज्ञाते पुनर्ग्राहयिष्याम्युपायान्तरेणापीति प्रष्टुरभिप्रायो यत्नान्तरमास्थाय शिष्यः कृतार्थः कर्तव्य इत्याचार्यधर्मः प्रदर्शितो भवति । कच्चित् किमेतन्मयोक्तं श्रुतं श्रवणेनावधारितं पार्थ किं त्वयैकाग्रेण चेतसैकचित्तेन किं वा प्रमादितं कच्चिदज्ञानसंमाहोऽज्ञाननिमित्तः संमोहो वैचित्तभावोऽविवेकता स्वाभाविकः किं प्रनष्टो यदर्थोऽयं शास्त्रश्रवणायाससंभवस्तव मम चोपदेष्टृत्वायासः प्रवृत्तस्ते तुभ्यं धनंजय ॥ ७२ ॥

आ० टी० । आचार्येण शिष्याय यावदज्ञानसंशयविपर्यासस्तावदनेकधोपदेष्टव्यमिति दर्शयितुं भगवानर्जुनं प्रति पृष्टवानित्याह **शिष्यस्येति** । प्रष्टुराभिप्रायं प्रकटयाति **तद्ग्रहण इति** । शिष्यश्चेदुक्तं गृहीतुं नेष्टे तर्हि तं प्रत्यौदासीन्यमाचार्यस्योचितं तस्य मन्दबुद्धित्वादित्याशङ्क्याह **यत्नान्तरमिति** । कच्चिदिति कोमलप्रश्ने । तमेव व्याचष्टे **किमेतदिति**। द्वितीयं किंपदं पूर्वस्य व्याख्यानतया संबध्यते **कच्चिदिति** । द्वितीयं प्रश्नं विभजते **किं प्रनष्ट इति** । मोहप्रणाशस्य प्रसंगं दर्शयति **यदर्थ इति** ॥ ७२ ॥

प० टी०। सम्यग्बोधानुत्पत्तौ पुनरुपदेक्ष्यामीत्याशयेनाह **कच्चिदिति**।अज्ञानसंमोहस्ते प्रनष्टः कच्चिदिति प्रश्नार्थविपर्ययः, स्पष्टमन्यत् ॥ ७२ ॥

अर्जुन उवाच ।

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ॥
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३ ॥

अर्जुन उवाच **नष्टो** मोहोऽज्ञानजं तमः समस्तसंसारानर्थहेतुः सागर इव दुस्तरः, स्मृतिश्चात्मतत्त्वविषया लब्धा यस्या लाभात् सर्वग्रन्थीनां विप्रमोक्षः, त्वत्प्रसादात्तव प्रसादान्मया त्वत्प्रसादमाश्रितेनाच्युत, अनेन मोहनाशप्रश्नप्रतिवचनेन सर्वशास्त्रार्थज्ञानफलमेतावदेवेति निश्चितं दर्शितं भवतीति । यदुताज्ञानसंमोहनाश आत्मस्मृतिलाभश्चेति तथा च श्रुतावनात्मविच्छोचामीत्युपन्यस्यात्मज्ञाने सर्वग्रन्थिविप्रमोक्षो भिद्यते हृदयग्रन्थिस्तत्र को मोहः कः शोक एकत्वमनुपश्यत इति च मन्त्रवर्णः । अथेदानीं त्वच्छासने स्थितोऽस्मि गतसंदेहो मुक्तसंशयः करिष्ये वचनं तवाहं त्वत्प्रसादात् कृतार्थो न मे कर्तव्यमस्तीत्यभिप्रायः ॥ ७३ ॥

आ० टी० । प्रेमोपदिष्टात्मज्ञानस्य अज्ञानसंदेहविपर्यासरहितस्येष्टस्य भगवदनुग्रहप्राप्ति कथनेन भगवन्तं परितोषयिष्यन्नर्जुनो विज्ञापितवानित्याह **अर्जुन इति**। अज्ञानोत्थस्याविवेकस्य नष्टत्वमेव स्पष्टयति **समस्त इति** । स्वयं ज्योतिषि प्रतीचि ब्रह्मण्यविद्याभ्रमं विघातयति।नाविदितं प्रकाशयतीति मत्वाह **स्मृतिश्चेति** । स्मृतिलाभे किं स्यादिति चेत्तदाह **यस्या इति** । मोहनाशस्मृतिप्रतिलम्भे चासाधारणकारणमाह **त्वत्प्रसादादिति** । प्रकृतेन प्रश्नप्रतिवचनेन लब्धमर्थं कथयति **अनेनेति** । यदुक्तं स्मृतिप्रतिलम्भादशेषतो हृदयग्रन्थीनां विप्रमोक्षः स्यादिति तत्र प्रमाणमाह **तथा चेति** । ज्ञानादज्ञानतत्कार्यनिवृत्तौ श्रुत्यन्तरमपि संवादयति **भिद्यत इति** । भगवदनुग्रहादज्ञानकृतमोहहानं तदनन्तरमात्मज्ञाने प्रतिलब्धे त्वदाज्ञाप्रतिज्ञोऽहमित्युत्तरार्धं व्याकरोति **अथेति** । तव वचनं करिष्येऽहमित्यत्र तात्पर्यमाह **अहमिति** ॥ ७३ ॥

प० टी० । कृतार्थः सन्नर्जुन उवाच **नष्ट इति** । आत्मविषयो मोहो नष्टः । यतः अयमहमस्मीति स्वरूपानुसंधानरूपा स्मृतिस्त्वत्प्रसादान्मया लब्धा अतः स्थितोऽस्मि युद्धायोत्थितोऽस्मि गतः स्वधर्मविषये संदेहो यस्य सोऽहं तवाज्ञां करोमि ॥ ७३ ॥

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ॥
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥

परिसमाप्तः सकलाम्नायशास्त्रार्थोऽथेदानीं कथासंबन्धप्रदर्शनार्थं संजय

उवाच इत्येवमहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिमं यथोक्तमश्रौषं श्रुतवानस्मि अद्भुतमत्यन्तविस्मयकरं रोमहर्षणं रोमाञ्चकरम् ॥ ७४ ॥

आ० टी० । शास्त्रार्थे समाप्ते सत्यस्यामवस्थायां संजयवचनं कुत्रोपयुक्तमिति तदाह **परिसमाप्त इति** । वासुदेवस्य सर्वज्ञस्य सर्वेश्वरस्य कृतार्थस्य पार्थस्य पृथासुतस्यार्जुनस्य महात्मनोऽक्षुद्रबुद्धेः सर्वाधिकारिगुणसंपन्नस्य सम्यग्वादं संवादं गुरुशिष्यभावेन प्रश्नप्रतिवचनाभिधानमिममनुक्रान्तमद्भुतं विस्मयकरं रोमाणि हर्षन्ति पुलका भवन्त्यनेनेति रोमहर्षणमाह्लादकं यथोक्तं श्रुतवानस्मीत्याह **इत्येवमिति** ॥ ७४ ॥

प० टी० । तदेवं धृतराष्ट्रं प्रति श्रीकृष्णार्जुनसंवादं कथयित्वा प्रस्तुतां कथामनुसंदधानः संजयः प्राह **इत्यहमिति** । अद्भुतमपूर्वाश्चर्यकरमत एव रोमहर्षणं रोमाञ्चकरं संवादमश्रौषं । श्रुतवानहम् । स्पष्टमन्यत् ॥ ७४ ॥

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ॥
योगं योगेश्वरात् कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥

तं चेमं व्यासप्रसादात् ततो दिव्यचक्षुर्लाभात् श्रुतवान् ज्ञातवानेतं संवादं गुह्यमहं परं योगं योगार्थत्वाद् ग्रन्थोऽपि योगस्तं संवादमिमं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयं न परंपरातः ॥ ७५ ॥

आ० टी० । प्रकृष्टं संवादं कथमश्रौषीरिति चेत्तत्राह **तं चेति** । एतत्पदं संवादपरत्वात्तल्लिङ्गत्वेन नेतव्यमित्याह **एतमिति** । परमपुरुषार्थोपयिकत्वात् परत्वं परं गुह्यमतिशयेन गुह्यं रहस्यमिति वा योगो ज्ञानं कर्म च तदर्थत्वादयं संवादो योग उक्तः, अथवा चित्तवृत्तिनिरोधस्य योगस्याङ्गत्वादयं संवादो योग इत्याह **संवादमिति** । योगानामीश्वरो योगेश्वरस्तदनुग्रहहेतुत्वाद्योगतत्फलयोस्ततः साक्षादव्यवधानेन श्रुतवान् न परंपरयेत्याह **योगेश्वरादिति** । स्वयं स्वेन परमेश्वरेणातिरस्कृतज्ञानैश्वर्यरूपेण कथयतो व्याचक्षाणादित्यर्थः ॥ ७५ ॥

प० टी० अथात्मन ईदृशश्रवणासंभावनामाह **व्यासेति** । मत्सेवया प्रसन्नेन भगवता व्यासेन मह्यमलौकिकं मच्चक्षुःश्रवणादिकं दत्तं तेनाहं श्रुतवानस्मि । किं तदित्याह । परं योगं । परत्वमेवाह । योगेश्वराच्छ्रीकृष्णात्स्वरूपं स्वयमेव वा साक्षात्स्वमुखेनार्जुनं प्रति कथयतः श्रुतवान् । तदुक्तं महाभारते भीष्मपर्वणि संजयेन धृतराष्ट्रं प्रति—'नमस्तस्मै भवतिपित्रे पाराशर्याय धीमते । यस्य प्रसादाद्दिव्यं मे प्रज्ञाविज्ञानमुत्तमम् । दृष्टिश्चातीन्द्रिया राजन् दूराच्छ्रवणमेव हि । परचित्तस्य विज्ञानमतीतानागतस्य च । च्युतोपपत्तिविज्ञानमाकाशे च गतिं सदा । शस्त्रैरसंगो युद्धे च वरदानान्महात्मनः । प्रत्यक्षं यन्मया दृष्टं दृष्टं योगबलेन च । शृणु तत्पृथिवीपाल मा च शोके मनः कृथाः' ॥ ७५ ॥

राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ॥
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

हे राजन् धृतराष्ट्र संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पुण्यं श्रवणादपि पापहरं श्रुत्वा हृष्यामि च मुहुर्मुहुः प्रतिक्षणम् ॥ ७६ ॥

आ० टी० । यथोक्तं संवादं भगवतः श्रुत्वा किमुपेक्षसे नेत्याह **राजन्निति**। पुण्यत्वं साधयति **श्रवणादपीति** ॥ ७६ ॥

प० टी० । अथ व्यासप्रसादसामर्थ्यमेवानुवदति **राजन्निति** । राजन् धृतराष्ट्र इममद्भुतं केशवार्जुनयोः संवादं संस्मृत्य सकृच्छ्रुतमपि स्मरणारूढं कृत्वा पुनर्यथावत्संस्मृत्य । मयि निष्पन्नोऽयं गीतार्थसंग्रह इति हृष्यामि रोमाञ्चितो भवाम्येतावतैव कृतकृत्योऽस्मीति हर्षं प्राप्नोमि ॥ ७६ ॥

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ॥
विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥७७॥

तच्च संस्मृत्य रूपमत्यद्भुतं हरेर्विश्वरूपं विस्मयो मे महान् हे राजन् हृष्यामि च पुनः पुनः ॥ ७७ ॥

आ० टी० । यत्तु विश्वरूपाख्यं रूपं सगुणमर्जुनाय भगवान् दर्शितवान् ध्यानार्थं तदिदानीं स्तौति **तच्चेति** ॥ ७७ ॥

प० टी० । किं च **तच्चेति** । तच्चाद्भुतं हेरेरूपं विश्वरूपमुभयवाक्यैः श्रुतं न च दृष्टं तथाविधमपि प्रथममक्षरतः संस्मृत्य पुनरर्थं च संस्मृत्य मे महान् विस्मयो भवति । अहो कथमर्जुनस्य भाग्यं यद्देवैरपिद्रष्टुमशक्यं परमात्मनः समष्टिरूपं साक्षात्कृतवांस्तथा सकलागमागोचरोऽपि परमात्मा कृपया पारमार्थिकं स्वरूपं दर्शितवानिति सविस्मयत्वेनाद्भुतरसस्याविर्भावेन रोमहर्षाद्यष्टसात्त्विकोद्रेकशाली पुनः पुनर्भवामीत्यर्थः । तदेवं विश्वरूपदर्शने ' द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्, । मया हतांस्त्वं जहि मा व्यथिष्ठा ' इत्यादिभगवद्वाक्यानि, तथा 'अमी च त्वां धृतराष्ट्रस्य पुत्राः संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः' इत्यर्जुनवाक्यानि च त्वया मन्मुखाच्छ्रुतान्येव ॥ ७७ ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥

किं बहुना यत्र यस्मिन् पक्षे योगेश्वरः सर्वयोगानामीश्वरस्तत्प्रभवत्वात् सर्वयोगबीजश्च कृष्णो यत्र पार्थो यस्मिन् पक्षे धनुर्धरो गाण्डीवधन्वा तत्र श्रीस्तस्मिन् पाण्डवानां पक्षे विजयस्तत्रैव भूतिः श्रियो विशेषविस्तारो भूतिर्ध्रुवाव्यभिचारिणी नीतिर्नय इत्येवं मतिर्ममेति ॥ ७८ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य पूज्यपादश्रीमच्छङ्करभगवतः कृतौ गीताभाष्ये मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥

आ० टी० । द्वयोरपि कृष्णार्जुनयोर्नरनारायणयोः संवादस्य प्रामाण्यार्थं परमुत्कर्षं दर्शयति **किं बहुनेति** । कथं सर्वेषां योगानामीश्वरो भगवानिति तत्राह **तत्प्रभवत्वादिति** । सर्वयोगो ज्ञानं कर्म च तस्य बीजं शास्त्रीयं ज्ञानवैराग्यादि तद्धि भगवदधीनं तदनुग्रहविहीनस्य तदयोगादतो योगतत्फलयोर्भगवदनुग्रहायत्तत्वाद्भगवतो योगेश्वरत्वमित्यर्थः । श्रीर्लक्ष्मीर्विजयः परम उत्कर्षः, राज्ञो धृतराष्ट्रस्य स्वपुत्रेषु विजयाशां शिथिलीकृत्य पाण्डवेषु जयप्राप्तिमैकान्तिकीमुपसंहरति **इत्येवमिति** । उपायोपेयभावेन निष्ठाद्वयस्य प्रतिष्ठापितत्वात् कर्मनिष्ठा परंपरया ज्ञाननिष्ठाहेतुः, ज्ञाननिष्ठा तु साक्षादेव मोक्षहेतुरिति शास्त्रार्थमुपसंहर्तुमितीत्युक्तम् ॥७८॥

काण्डत्रयात्मकं शास्त्रं पदवाक्यार्थगोचरम् ।
आदिमध्यान्तषट्केषु व्याख्यया गोचरीकृतम् ॥ १ ॥
संक्षेपविस्तराभ्यां यो लक्षणैरुपपादितः ।
सोऽर्थोऽन्तिमेन संक्षिप्य लक्षणेन विवक्षितः ॥ २ ॥
गीताशास्त्रमहार्णवोत्थममृतं वैकुण्ठकण्ठोद्भवं
श्रीकण्ठापरनामवन्मुनिकृतं निष्ठाद्वयद्योतितम् ।
निष्ठा यत्र मतिप्रसादजननी साक्षात्कृतं कुर्वती
मोक्षे पर्यवसायिनी प्रतिदिनं सेवध्वमेतद् बुधाः ॥ ३ ॥
प्राचामाचार्यपादानां पदवीमनुगच्छता ।
गीताभाष्ये कृता टीका टीकतां पुरुषोत्तमम् ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यभगवदानन्दगिरिविरचिते श्रीगीताभाष्यविवेचनेऽष्टादशोऽध्यायः ॥ १८ ॥

ॐ तत्सद् ब्रह्मार्पणमस्तु ॥

प० टी० । अतः परं तव पुत्राणां जीवनसंदेहः किं पुनाराज्यप्राप्तिरिति मनसा विचार्य पाण्डवेभ्यः सर्वस्वं दत्वा श्रीकृष्णं शरणं गत्वा प्राणसंरक्षणं कार्यमित्याशयेनाह **यत्रेति** । यत्र येषां पक्षे योगमायेश्वरः कृष्णो वर्तते । टिप्पणिकासु—कर्षणेन मनोभूमेर्निवृत्तिः फलमाप्यते । कृष्णनाम्ना

समाम्नातस्तस्मात्त्वं देव ईदृश इति । यत्र च तत्पक्षपातसाधितसकलपुरुषार्थः पार्थो धनुर्धरो गाण्डीवधन्वा परमेश्वरस्य विभूतिर्वर्तते तत्रैव श्रीराज्यलक्ष्मीस्तत्रैव विजयस्तत्रैव भूतिरुत्तरोत्तरैश्वर्यं तत्रैव ध्रुवाचला नीतिर्नियमार्गः । न त्वन्यायिनां तव पुत्राणां लाक्षागृहे गरदानभ्रातृजायावस्त्राहरणादिकूटकारिणामिति मे मतिर्निश्चयः । तदुक्तं भारते आदिपर्वणि धृतराष्ट्रं प्रति संजयेन 'तव पुत्रा दुरात्मानः प्रतप्ताश्चैव मन्युना । लुब्धा दुर्वृत्तभूयिष्ठा न तान् शोचितुमर्हसि' इति । तथारण्यकेऽपि 'द्रौपदीहरणे भग्नो युधि राजा जयद्रथः । शिवं प्रसाद्य तपसा ययौ च जयमर्जुनात् ।' इति राजा ब्रवीद्देवं नेति देवस्तमब्रवीत् । ऋतेऽर्जुनं महाबाहुर्देवैरपि दुरुत्सहम् । यमाहुरजितं देवं शङ्खचक्रगदाधरम् । प्रधानं शास्त्रविदुषं तेन कृष्णेन रक्षितम्' इति ॥ ७८ ॥

अथ संजयस्य धृतराष्ट्रस्य च हार्दं व्यावर्ण्यते ।

यो लाक्षावेश्मदाहादतिविषमविषाद्विप्रशापाद्वनान्ते
दुष्टद्यूतात्सभायां युवतिपरिभवात्संजुगोप स्वभक्तान् ॥
दूतः सूतश्च भूत्वा स युधि निजजने किं करिष्यत्युपेक्षां
सत्येवं तावकानां त्रिगुणहतधियां जीवितेच्छाधुनापि ॥ १ ॥
उपनिषदुपदेशतीक्ष्णबाणैर्हृदि वसतोऽपि जघान यः सपत्नान् ॥
स्वचरणशरणस्य पाण्डुसूनोः स च किमु न प्रभवेन्निहन्तुमेतान् ॥ २ ॥
कृष्णोऽखिलप्रलयहेतुरचिन्त्यशक्तिः शत्रुषु तेन तनयेषु कियान् पुमर्थः ॥
पार्थस्य वा निहतमारणके तु पुण्यं पुण्यैर्यशो भवति संजय नार्जवेन ॥ ३ ॥
रणे मरणमस्ति चेच्छरणमागतैः किं भवेत्ततोऽपि यदि जीवनं किमु तदच्युतोक्तिर्मृषा ॥
अथापि यदि जीव्यते वरमतो मृतिर्भूभुजामिदं मनसि ।चिन्तयन् कुरुपिताथ तूष्णीमभूत् ॥ ४ ॥

अथाध्यायतात्पर्यम्—

अध्यायैर्यश्च सप्ताधिकदशभिरभिप्राय उक्तः क्रमेण
संन्यासत्यागपूर्वस्त्रिविधमतिधृतिज्ञानकर्तृक्रियादिः ॥
ब्रह्मप्राप्तेरुपायः पुनरपि गदितोऽष्टादशे संग्रहार्थं
पार्थस्तेनोदतिष्ठन्ननु समरकृते त्यक्तसंदेहजातः ॥ १ ॥
जगति समवतीर्णामत्रसाक्षादपर्णां सदसि द्रुपदकन्यां कुर्वतां वस्त्रशून्याम् ॥
रणभुवि निहतानामप्यभूदुद्धतानां यदुपतिविमुखानां रौरवः कौरवाणाम् ॥ १ ॥
रणशिरसि शरौघैर्धार्तराष्ट्रानमोघैस्तदनुगजनभीष्मद्रोणकर्णांश्च हत्वा ॥
कलितविजयलक्ष्मीर्यादवेशोपदेशादधिगतपरमार्थः पार्थ आसीत्कृतार्थः ॥ २ ॥
छन्दःसंदर्भगर्भप्रभुगहनगिराभृग्यजुःसामभीमा-
मीमांसामांसलान्तःकरणपरिणमत्संगतीनां गतिः क्व ॥
क्वास्माकं धीरधीरा तदपि रचयितुं भाष्यमुद्योगभाजां
प्रागल्भ्यं डिम्भवाचामिव कुतुकरताः क्षन्तुमर्हन्तु सन्तः ॥ ३ ॥
अभिप्रायः प्रायः सकलनिगमानामधिगतः सुधीभिर्यैर्ये स्युर्भगवदनुकम्पाश्रयवशात् ॥
चिरं सान्द्रानन्दानुभवरसिकास्तत्र सुजनाः सुविश्रान्तिं यान्ति प्रसभमपरे नेह विवृतौ ॥ ४ ॥
गभीराभिप्रायान् सुगमवचनैरुद्धृतवतां कवीनां स्वग्रन्थे भवति बहुविस्तारणभयम् ॥

कृते सूत्रप्राये दुरधिगमता दूषणमतः सविस्तारः श्लाघ्यः शमयति हि यः संशयभरम् ॥ ५ ॥
विदित्वा वेदार्थं दशवदनवाणीपरिणतं शतश्लोकव्याख्यां परमरमणीयामकरवम् ॥
ततो गीताभाष्यं निखिलनिगमार्थैकनिलयं विधिज्ञार्यैः सूर्यो नृहरिकरुणापाङ्गशरणः ॥ ६ ॥
गोदोदक्तटपूर्णतीर्थनिकटे पार्थाभिधानं पुरं तत्र ज्योतिषिकान्वये समभवच्छ्रीज्ञानराजाभिधः ॥
तत्सूनुर्निगमागमार्थनिपुणः सूर्याभिधानः कविः कृष्णप्रेरणया तदर्पणाधिया गीतार्थभाष्यं व्यधात् ॥७॥

इति श्रीमद्दैवज्ञपण्डितसूर्यविरचितायां भगवद्गीताटीकायां परमार्थप्रपायां सकलगीतार्थसंग्रहे ब्रह्मार्पणसंन्यासयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥ ॐ तत्सद् ब्रह्मार्पणमस्तु ॥